HARIBHADRA SURI CHARITRA



BY

Pandit Hargovind Das T. Sheth

Nyaya-tirtha, Vyakarana-tirtha and Sanskrit
Examiner of the Calcutta University.



1917] [Price 4 annas

Printed at the Chandraprabha Press
BY
Manager Gaurishanker Lall
AND
Published by Jaina Vividha Sahitya Shastra Mala Office, Benares City.

जैन विविध-साहित्य शास्त्र-माला (२)

हरिभद्रसूरिचरित्रम् ।



कर्त्ता

राजधन्यपुरवास्तव्य-श्रेष्ठित्रिकमचन्द्रात्मजः

कलिकाताराजकीयपाठालयपरीक्षको

न्यायतीर्थ-व्याकरणतीर्थपण्डित-

हरगोविन्ददासः ।



वीरसम्वत् २४४३]

[मूल्यमाणकचतुष्टयम् ।

बुद्धः शुद्धो न शुद्धोदनतनयनयो नास्तिको नास्तदोषो
नो न्याय्यो न्यायमार्गो विमलमतिमता नापि वैशेषिकी दृग् ।
प्रेक्षावित्रं न सांख्यं न सततमहतं शासनं जैमिनीयं
गम्भीरप्रौढतर्के विलसति सति सद्वाङ्मये हारिभद्रे ॥ १ ॥

समर्पणम् ।

अन्योपकारकरणार्पितजीवनस्य
सूरीशितुर्विजयधर्मगुरोर्गुणाब्धेः ।
हस्ताम्बुजेषु विनयावनतोऽर्पयामि
भक्त्या लघु कृतिमिमामहमादरेण ॥

कर्त्ता ।

-॥ अर्हम् ॥-



श्रीपादाक्रान्ततेजस्वि-जगतीभृज्जयत्ययम् ।
धर्पयसुदक कर्म्ब सूरो व तमसामरि· ॥ २ ॥

S L N Press Benares

प्रस्तावना ।



लघीयानप्यैतिहासिकचरित्रात्मकोऽयं ग्रन्थः। प्राचीनेतिहासविषयकोपयुक्तसमग्रसामग्र्या अभावस्य सुविदिततया, कस्याप्यैतिह्यवृत्तान्तस्याप्रूकचूकं यथायथमधिगमस्योल्लेखस्य वाऽभिलापो दुरभिलापमात्रम्, इति न केवलं दु साधैव, असाध्याप्यस्मादृशां तत्पूर्त्तिः। सतामप्यन्धकारावृतानामिवाप्रकटतया, यत्र तत्र व्यस्ततया चावस्थितानां कतिपयतदंशानां सकलनं च, तत्तद्ग्रन्थसार्थावगाहनेन, यथास्थानं तदुपलब्धवृत्तशकलविनिवेशनेन, परस्परविसंवादिषु तेषु ताटस्थ्यतस्तथ्यातथ्यत्वविनिर्णयाधानेन च तत इतः कष्टैकत्रीकृत्येष्टिकासमुदायं महाप्रासादविनिर्माणमिव प्रभूतपरिश्रम समयव्ययमपि न सर्वथाऽशक्यम्, अथ चात्यावश्यकमित्यवधार्य तत्करणे व्यापृतोऽभूवम्। यथासाध्यं विहितचेष्टोऽपि क्रियानिह सफलः समभूवमिति विनिश्चयं पाठकप्रवरा एव कुर्वन्तु, न हि तत्र मेऽधिकार इति।

एतन्निबन्धे क्वचिदालम्बनतया, कुत्रचित् प्रमाणतया, क्वचन सवादकात्मना वोपयुक्तानां प्राचीनानामर्वाचीनानां वा ग्रन्थानां तत्कर्तॄणां च नामानि प्रायस्तत्तत्स्थलेष्वेव निर्दिष्टानि, इह तेषां सर्वेषां, विशेषतश्च श्रीप्रभाचन्द्रसूरीणां, येषां प्रभावकचरित्रेणाधिकं साहाय्यमनुष्ठितम्, कृतज्ञतामङ्गीकरोमि।

मन्मित्रप्रवरस्य 'शेठ कृष्णाजी वालहाजी' इत्यस्य, 'शेठ धनजीभाई बखतचन्द' इत्येतस्य चोपकारमत्रानुस्मरामि, याभ्यामहमस्मिन् कार्ये प्रोत्साहितः।

कर्त्ता।

॥ अर्हम् ॥

*हरिभद्रसूरिचरित्रम् ।



आदर्शसंकाशानि किल महात्मनां जन्मत प्रभृति पर्यवसानावसानानि चरित्राणि, यत्र प्रतिफलन्तीर्दोषादोषवती. स्वाचारप्रवृत्तीर्हेयोपादेयत्वाभ्या विवेकचक्षुषा प्रेक्षन्ते प्रेक्षावन्त, क्षमीभवन्ति च हातव्य विहाय, उपादातव्यमुपादाय, उपेक्षितव्यं चोपेक्ष्य सर्वथा

---

* एतदेव नामालङ्कृतवन्तो भूरय सूरय समजनिषत, तथाहि–

(१) याकिनीमहत्तरासूनुत्वेन प्रख्यात प्रस्तुत एव चरितनायक, यो दर्श्यमानेषु सर्वेष्वपि प्राचीनतम, यद्ग्रन्थानामुपलक्षकश्च 'विरह'-इत्यङ्क, यस्य चावसानसमयोऽग्रे विस्तरतो मीमांसित ।

(२) बृहद्गच्छीयजिनदेवसूरिशिष्य, योऽणहिल्लपुरे (Patan, In Gujarat) सिद्धराजराज्ये ११८५ वैक्रमे संवत्सरे वाचकशिरोवतंसस्योमास्वाते प्रशमरतिनाम्नो ग्रन्थस्य विवरणमकार्षीत्, यत् त एव तद्ग्रन्थप्रशस्तौ,–

"भव्या बभूवु शुभम(श)स्यशिष्या अध्यापका श्रीजिनदेवसञ्ज्ञा ।
तेषां विनेयैर्बहुभक्तियुक्तै प्रज्ञाविहीनैरपि शास्त्ररागात् ॥ २ ॥
श्रीहरिभद्राचार्यै रचित प्रशमरतिविवरण किञ्चित् ।
परिभाव्य वृद्धटीका. सुखबोधार्थं समासेन ॥ ३ ॥
अणहिल्लपाटकनगरे श्रीमज्जयसिंहदेवनृपराज्ये ।
बाण वसु रुद्रसङ्ख्ये विक्रमतो वत्सरे व्रजति ॥ ४ ॥"

(३) नागेन्द्रगच्छीय कलिकालगौतमविरुदक श्रीआनन्दसूरि अमरचन्द्रसूरिशिष्य स्याद्वादमञ्जरीप्रणेतृमल्लिषेणसूरिगुरूणामुदयप्रभसूरीणां प्रगुरु, श्रीविजयसेनसूरीणां गुरुश्च, सिद्धराजराज्यकाल एवासादितसत्ताक, इत्युदयप्रभसूरिधर्माभ्युदयमहाकाव्यप्रशस्तिगतैरमीभि श्लोकैरवगम्यते–

"आनन्दसूरिरिति तस्य बभूव शिष्य पूर्वोऽपर शमधरोऽमरचन्द्रसूरि ।
धर्मद्विपस्य दशनाविव पापरक्षःक्षोदक्षमौ जगति यौ विशदौ विभात ॥३॥
अम्भोधिपद्यपयसोनिधिमन्दराद्रिमुद्राजुषो किमनयो स्तुमहे महिम्न ।
बाल्येऽपि निर्दलितवादिगजौ जगाद यौ व्याघ्रसिंहशिशुकाविति सिद्धराज ॥४॥

महात्मवृत्तमनुकर्तुम् । अयमपि प्रस्तुतश्चरितनायको विचक्षणचेतश्चमत्कारचञ्चुकार्यव्यूहकर्तृत्वेन महात्मस्वेकतम इत्यत्र केन किं वक्तव्यम् ? । ततस्तद्वितिवृत्तमहमहमिकया जिज्ञासवः समभिलषेयुर्निपातुमिति स्वभावोपस्थितमिदं विवेकिनाम् । किन्तु बहु बहु समीहमानोऽपि, विहिततद्गवेषणायासश्चापि दुर्भगतोपहतो न कुतोऽपि

सिद्धान्तोपनिषन्निषण्णहृदयो धीजन्मभूमिस्तयोः
पट्टे श्रीहरिभद्रसूरिरभवच्चारित्रिणामग्रणीः ।
भ्रान्त्वा शून्यमनाश्रयैरतिचिराद् यस्मिन्नवस्थानतः
संतुष्टैः कलिकालगौतम इति ख्यातिर्वितेने गुणैः ॥५॥
श्रीविजयसेनसूरिस्तत्पट्टे जयति जलदवन्वानः ।
यस्य गिरो धारा इव भवदवभवदवथुविभवभिदः ॥६॥

भासङ्कविकृतविवेकमञ्जरीवृत्तिकर्ता बालचन्द्रसूरिरप्यस्यैव हरिभद्रसूरेः शिष्यत्वेन निजं स्वग्रन्थप्रशस्तौ प्रत्यभिजानीते; तथा च तत्रस्थ उल्लेखः-

"एतामासडजैत्रसिंहसचिवेनात्यर्थमभ्यर्थितो
वृत्तिं श्रीहरिभद्रसूरिसुगुरोः शिष्यप्रशिष्यावधिः ।
वाग्देवीप्रतिपन्नसूनुरकृत श्रीबालचन्द्राख्यया
विख्यातोऽधिपतिर्गणस्य गणिनीरत्नश्रियो धर्मजः ॥१३॥
नागेन्द्रगच्छार्णवपार्वणेन्दुरेतां बृहद्गच्छनभोरविश्च ।
श्रीमान् विपूर्वो जयसेनसूरिः श्रीपद्मसूरिः समशोधयेताम् ॥१४॥"

एतत्प्रणेतृकायामुपदेशकन्दलीटीकायामपीदमावकः प्रशस्तिभागः समुपलभ्यते ।

(४) बृहद्गच्छीयश्रीमानभद्रसूरिशिष्योऽप्येकतमो हरिभद्रसूरिः, यं जयवल्लभकविना श्वेताम्बरजैनेन विहितस्य प्राकृतीयपद्यालय (वज्जालय)-ग्रन्थस्य च्छायायाः प्रणेता गुरुत्वेनोपलक्षयति; प्रमाणमत्र तस्यैव ग्रन्थस्यायमन्तभागः;-

"गच्छे पृथौ श्रीमति मानभद्रसूरिर्बभूव प्रथितः पृथिव्याम् ।
तदीयपट्टे हरिभद्रसूरिर्जज्ञेऽखिलक्ष्मातललोकपूज्यः ॥ १ ॥
तच्छिष्यलेशोऽस्ति गुणानुरक्तः श्रीधर्मचन्द्रः सकलः कलाभिः ।
निपीय यद्वागमृतं सुधाया मनोहरं नो विबुधाः स्मरन्ति ॥ २ ॥
विद्या(पद्या)लयं प्राकृतेऽस्मिन् सुभाषितमणाब्हो ! ।
लिलेख लेखकच्छायां रत्नदेवश्च तद्गिरा ॥ ३ ॥
शिखि-ग्रहा-ऽग्नि-चन्द्रैर्हि प्रमिते वत्सरे वरे ।
ग्रन्थोऽयं संख्यया ख्यातः सहस्रत्रितयं ननु ॥ ४ ॥"

समासीत्तदमस्य सामस्त्यतो जन्मादिवृत्तान्तम् । हेतुश्चात्र प्राचां स्वत स्ववृत्तान्ताख्याने बलादापतन्त्या आत्मश्लाघाया प्रतिबन्धकत्वम्, फलानुमेयप्रारम्भत्वेन तेषां तस्या दोषरूपत्वाङ्गीकारात्, समानसमयानामपरविदुषां च प्रायस्तुल्यकोटिमाबिभ्रतां तद्वृत्तस्य तादृशाश्चर्यनिबन्धनत्वाभावेन, भावेऽपि वाद्यतनजनदुर्भाग्यवशेन चिरस्मृतिविषयीकर्तुमनादृतलक्ष्यत्वम्, तदादरेऽपि वान्यग्रन्थानामिव कालमाहात्म्यतोऽस्यापि कथाशेषीभवनम्, पश्चाद्भवानां च तदुल्लेखं चिकीर्षतामप्यस्मादृशामिव तद्वेदनोपायाभावसाम्यमिति । या पुनर्यावती काचिज्जीवनमात्रा सूरिसम्बन्धिनी तत इतः समुपलभ्यते, सापि पञ्चषेष्वेवाथ च गौरवभराङ्कितत्वेन शिलाप्रदेषु प्रसङ्गेषु पर्यवसीयमाना न कार्त्स्न्येन तच्चरित्रमवबोधयितुं प्रत्यला, तथाप्युपकारकसामग्रीघटकस्तदंशोऽपि तावन्मात्रयोपकर्तुं प्रभवति, इति सर्वाविसंवादिवचनादशतः प्राप्यमाणस्याप्येतद्वृत्तस्य चित्रघटनाघटितत्वेन महत्त्वान्वितत्वेन चेह क्रियमाण उल्लेखो न नाम नात्यन्तमौचितीमञ्चिष्यति ।

आसीदिह द्विधाप्युच्चत्वमादधाने, द्यावापृथिव्याविव सदधाने, विदधाने च विविधशृङ्गसगततयान्वर्थमभिधानम्, अद्यापि प्रसिद्धिभाजि चित्रकूटपर्वते, तिरस्कृतधनदनगरमिवानेकैर्धनदैरधिष्ठितम्, धृतस्पर्धमिव सुरपुरेण बहुविबुधपतिभिरलङ्कृतं त्रिशकूटं नाम नगरम् । तत्र प्रतापाक्रान्तदिक्चक्रोऽरातिराजिभिरसहनीयोर्जस्विराङ्बलो जितशत्रुरिति नाम्ना नृपती राज्यमन्वशिषत् । तस्य चतुर्दशविद्यानीरनिधिपारदृश्वा विप्रकुलप्रसूतो 'हरिभद्र' इति विश्रुतनामधेयः पुरोहितः समभूत्, यः स्वज्ञानप्राग्भारमजीर्यन् 'क्व खलु समस्ति समस्तेऽपि भुवनमण्डले मादृशस्तादृशानवद्यविपुलविद्याविशारदो धीमान् ?' इति विद्यागर्वाध्मातमानसः 'क्षितितलवर्तिनो विदुषः क्षितिं विदार्यापि विजयेय, सलिलान्तश्चारिणस्तत्र प्रविश्यापि पराभावयेयम्, गगनाङ्गणगामिनश्च तांस्तत आकृष्यापि परिभवमानयेयम्' इति जगत्त्रितयनिवासिविज्ञविजयश्रियमात्मसात् कर्तुमभिवाञ्छंस्तदुत्कटघटाटोपसटङ्कमिव निष्टङ्कयन्नवदारणादितश्चिह्नानां त्रितयीमदीधरत्, तादृशशास्त्रसमूहसम्पर्केण द्विधाभवद् हृदयमिव प्रदर्शयन्नुदरे स्वर्णपट्टमतिक्षिपन्, अनीविशद्य जम्बूवृक्षोपलक्षितक्ष्मावलये स्वसमानमनीषाजेमत्राभावमिव निर्दिशन् स्वशयशम्बरजन्मनि जाम्बवीं व्रततिम्, किं बहुना ?, ज्ञानमात्मस्य परां काष्ठामातिष्ठानोऽशेषशेमुषीभूतस्तृणमिव मन्यमानः, आत्मानं च सर्वज्ञमिव निःशेषातिशायिविज्ञानसम्पदमभिमन्यमानः 'येनाभिहितं नावबुध्येय, अन्तेवासी-

१ 'चितोड' इति भाषायाम् ।

भूयमवाप्य तस्य संतिष्ठेय' इति दुरूहहमयङ्करां प्रतिज्ञामप्यकार्षीत् ।

स चापरेद्युर्नरवाहनमध्यासीनः पुरश्चलद्भिरुदावलीपाठकवर्णिपटलेन पथि संचरमाणः समपश्यदेकं दुर्निग्रहग्रहाय तनामुपागत्य, समूलमालानस्तम्भमम्भोजलीलया समुन्मूल्य, स्वच्छन्दमन्तर्नगरमागम्य च तत इतः पर्यटाट्यया पुरनिष्टमूयिष्टहट्टालयावलीविलयमातन्वन्तम्, मृतिभीतिसंत्रस्तसमस्तवास्तव्यमनुष्यतिरश्चो विहितहाहारवं कान्दिशीकानासूत्रयन्तम्, बधिरयन्तं च गभीरभीषणारावैर्दिशां मण्डलम्, निर्झरद्दानप्रवाहपङ्किलिताचलातलं कपोलपालीविलीनलोलालिमालाकलितकोलाहलं विश्लिष्टनिजमुखासिकावाहिपूरुषनिवहं मदोन्मत्तमहाकुम्भिनमापतन्तम्; अथ च समयचातुरीमुपयुज्य चाञ्चल्यमधिश्रयमाणः प्लवङ्गम इव विटपिशिखराग्रिजयानादुन्प्लुत्य पुरःस्थितमेकं जिनपतिमन्दिरमध्यरुक्षत्ः ऊर्ध्वमधिष्ठितचतुश्च तदलङ्कुर्वतीमार्हतीं मुद्रां कथमपि लोचनगोचरीकृत्य मदग्रहिलतया परमार्थमनवबुध्य भुवनगुरावपि पद्यमिदमुपहासगर्भसंदर्भमाविरबीभवत्;—

"वपुरेव तवाचष्टे स्पष्टं मिष्टान्नभोजनम् ।
न हि कोटरसंस्थेऽग्नौ तरुर्भवति शाड्वलः ॥ १ ॥"

अनन्तरं तत्र भ्रमद्भिरस्तुमद्गणैरपररथ्यया व्यवहितं तं गजपुङ्गवमुपगम्य निजनिलयं प्रति प्रास्थित समाहितमानसो मूर्तिमानिव मानराजः ।

यानि कानिचिदमूर्तीनि मूर्तिमन्ति वा सत्त्वमाकलयन्ति वस्तूनि, निखिलानि तानि, यदा कदाचित्, यत्र कुत्रचित्, यथा कथञ्चित्, स्वभावतः प्रयोगतो वा, विपर्यस्तमविपर्यस्तं वा परिणाममाबिभ्रति, न पुनस्तद्रूपेणैव सर्वदा स्थेमानमश्नुवते, इत्यनतिक्रमणीयं निसर्गनियममनुसृत्य, तदभिमानस्य तेजोवस्तुन इव तामसतया विपर्ययेण परिणतिप्रसङ्गः प्राप्तावकाशः समजनिष्ट । स चायम्; एकदा राजप्रासादादवसितस्वीयकरणीयः प्रति स्वसद्म प्रतिष्ठानः पथिनध्यसंनिघतदुपाश्रयोर्ध्वसंस्थितया याकिनीनाम्न्या साध्व्याऽऽवर्त्यमानां श्रुतिमधुरिमाणमावहमानामार्यामिमामेकामश्रौषीत्;—

"चक्कीदुगं हरिपणगं पणगं चक्कीण केसवो चक्की ।
केसव चक्की केसव दु चक्की केसव चक्की य ॥ १ ॥"

---

१ चक्रिद्विकं हरिपञ्चकं पञ्चकं चक्रिणां केशवश्चक्री ।
केशवश्चक्री केशवो द्वौ चक्रिणौ केशवश्चक्री च ॥ १ ॥

अवसर्पिण्यामस्यां सामस्त्येन द्वादश चक्रवर्त्तिनः—षड्खण्डाधिपतयः, नव वासुदेवाश्च खण्डत्रितयस्वामिनः समभूवन्; येषां पूर्वं द्वौ चक्रवर्त्तिनौ,

एनामस्खलित कर्णमाधुर्यिकां प्रणीयापि, सावधानमनसा निपुणं विमृश्यापि नावोधि यदा तदर्थम्, तदा तद्विषमार्थदर्थितस्तत्क थिका जरतीं चकारबाहुल्यमात्रप्रणिहितमना सोपहासमिदमवोचत्- "अम्बाडे ! प्रभूतमत्र चाकचिक्यं विहितवती भवती"। सापि तदुपहासमुपगम्य प्रत्युत्तरे "पुत्रक ! नवलिप्तं सत्य चकचकायते" इत्येतं तस्य गाथार्थावबोधात्तमत्वेन नूतनच्छात्रता व्यङ्ग्यतया ज्ञापयन्तमुचितमेव वाक्प्रपञ्चमारचितवती। प्रतिवचनमिदं निशम्य स्वप्रतिज्ञामनुस्मृत्य "प्राणान्ते नो जहति कृतिनः स्वप्रतिज्ञातमर्थम्" इति नीतिसूक्तिमात्मनि चरितार्थयन् प्रार्थयामास तां निजं (हरिभद्रं) शिष्यभावेनोररीकर्तुम्, पठितगाथार्थसमर्थनं च विनिर्मातुम्। महत्तरया च तया "पुरुषान् विनेयीकर्तुम्, आगमार्थं च विवरीतुं नास्माकं भगवती समनुज्ञा, तद् यद्यभिलपसि प्रतिज्ञातमनुष्ठातुम्, आगमार्थं च विज्ञातुम्, भजस्व तर्हीदमेव नगरमलङ्कुर्वतामस्मद्धर्माचार्यजिनभटपादाना सन्निधानम्" इति समयमर्यादया प्रतिभाषितो हरिभद्रस्तामेव प्रतिश्रवप्रासगुरुतया भृशमाकाङ्क्षन्नपि तया सनिर्बन्धमेव मुक्तो गुर्वाज्ञानुपालन एव वस्तुत शिष्यत्वधर्मपर्यवसानमवगच्छन् "नाभिप्रेतनिष्पत्तये प्रतीक्षां समन्ते विचक्षणा" इति कालविलम्बमसहमानस्तदानीमेव सूरीश्वरसमीपमात्मानमुपस्थापयितुं विज्ञतया तया सार्धमधिगम्य गुरुपार्श्वं पारमेश्वरीं प्रव्रज्यामङ्गीचकारे, आसादयाञ्चकार च तस्या गाथाया जिनपतिसमयप्रतिबद्धाया अर्थम्। तया सूरिसमीपगमनसमये प्रागेव पन्थानमन्तरा पतन्तं तीर्थपतिविहारं नीयमानश्चाय भगवद्बिम्बं मूर्तिमन्तमिव शान्तरसं विभाव्य विभावितयथास्थितार्थतत्त्वं पूर्वकृतोपहासपापमिव स्तवनपुण्येन विशोधयितुकाम पूर्ववृत्तं,

"वपुरेव तवाचष्टे भगवन् ! वीतरागताम् ।
नहि कोटरसंस्थेऽग्नौ तरुर्भवति शाड्वल ॥ १ ॥"

तदनन्तरं पञ्च वासुदेवा, पश्चात् पञ्च चक्रिणः, अनन्तरमेको हरिः, तदुत्तरमेकश्चक्री, पुनरेको हरिः, पुनश्चक्रवर्त्ती, पश्चादर्धचक्री, अनन्तरं द्वौ सार्वभौमौ, पुनरेक केशव, एकश्च चक्री' इति पौर्वापर्येण तेषा क्रम इत्यर्थः।

१ इदमेवाभिप्रेत्य षड्दर्शनसमुच्चयलघुटीकाकृता मणिभद्रेणाप्युक्तम्,
"जैनं पदेकमपि बोधविधायि वाक्यमेव श्रुतिं फलवती शुचि येन चक्रे ।
चारित्रमाप्य वचनेन महत्तराया श्रीमान् स नन्दतु चिरं हरिभद्रसूरि ॥२॥"
तस्यैव बृहट्टीकाया गुणरत्नसूरिरप्येतत्सम्वादमाह-'याकिनीमहत्तरावचनावबोधलब्धबोधिबन्धुर' इति ।

इति चमत्कृतिकृता विपर्ययेण पर्ययीकृतन्; अभ्यष्टवीच्च विशेषतः

"जं दिट्ठी करुणातरंगियपुडा एयस्स सोमं मुहं
आयारो पसमापरो परियरो संतावसंनासणू ।
जंतूणं जर-जम्म-मच्चुहरणो देवाहिदेवो इमो
देवाणं अवराण दीसइ जओ नेयं सरूवं जए ॥ १ ॥"

इत्यादिना पद्यकदम्बकेन निजमान्तरमुद्गारयामप्रतिबन्नन् ।

पूर्वत एवान्यान्यशास्त्रनिष्णातमतेः कुशाग्रीयबुद्धेर्हरिभद्रस्य समुपात्तयतिव्रतमात्रस्य, इन्द्रभूतेरिव स्याद्वादिसिद्धान्तोदधिविगाहने वीरप्रभुरिव जिनभटसूरिर्निमित्तमात्रतामशिश्रियत् । यथा यथा जिनदर्शनाम्भोधेरप्राप्तपूर्वाणि दृष्टेष्टाविरुद्धसिद्धान्तरत्नानि स उपालब्ध, तथा तथा पूर्वावस्थाव्यतीतदिवसगणमनर्थकमबुध्यत, अमन्यत च मातुरिव बहु बहूपकारं याकिन्या महत्तरायाः, यया तस्य सर्वज्ञतादर्पसरीसृपः किञ्चिज्ज्ञतामार्दवविकस्वरशिरीषपुष्परूपेण परिणमय्येदृशमचिन्त्यमहिमानमवस्थामवापितः । अत एव स याकिनीसूनुत्वेनात्मानं तत्र तत्र प्रत्यपद्यत । क्रमेण परिवर्धमानचारित्रसकलगुणं सर्वशास्त्रधुराधौरेयताधारिणमनुचिहितसुविहितपूर्वतनमहर्षिचरितं हरिभद्रमुनिं सर्वथा सूरिपदयोग्यमवधार्य गुरुर्निजपट्टेऽभ्यषिञ्चत् ।

---

१ यद्दृष्टिः करुणातरङ्गितपुटैतस्य सोमं मुख-
माचारः प्रशमपरः परिकरः संतापसंनाशनः ।
जन्तूनां जरा-जन्म-मृत्युहरणो देवाधिदेवोऽयं
देवानामपरेषां दृश्यते यतो नेदं स्वरूपं जगति ॥ १ ॥

२ यद्यपि प्रभावकचरित्रादौ हरिभद्रस्य दीक्षा-शास्त्रपाठ-सूरिपदाद्यधिकारे गुरुरूपेण जिनभटसूरिव्यतिरिक्तस्यान्यस्य कस्याप्याचार्यस्य नाम नोपलभ्यते, तथाप्यावश्यकनिर्युक्तिप्रान्तस्थेनोल्लेखेन (See P. 7), यः 'अल्पमतेः' इति विशेषणान्यथानुपपत्त्या हरिभद्रसूरिकर्तृक एव निर्णीयते, पट्टगुरवो जिनदत्तसूरयः, 'जिनभटनिगदानुसारिणः' इत्यनेन तत्रत्येनैव विशेषणेन जिनभटसूरयस्त्वाज्ञागुरवो विद्यागुरवो वेति ध्येयम् ।

३ यथा दशवैकालिकनिर्युक्तिटीकायाम्;–

"महत्तराया याकिन्या धर्मपुत्रेण चिन्तिता ।
आचार्यहरिभद्रेण टीकेयं शिष्यबोधिनी ॥ १ ॥"

उपदेशपदेषु च;–

"जाइणिमयहरियाए रइता एते उ धम्मपुत्तेण, हरिभद्दायरिएण" ।

पञ्चसूत्रटीकायां च;–

एकदा हरिभद्रसूरिं कथमपि विरक्तभावमुपेयिवांसौ प्रहरस्तश-तयोधिनौ हंस परमहंसनामानौ स्वभागिनेयो प्रबोध्य दीक्षामजीग्रहत्, ययोरत्वञ्च निसर्गतोऽधिगतक्षयोपशमपाटवौ व्याकरण-साहित्य दर्शनादिशास्त्रेष्वतिव्युत्पन्नप्रज्ञौ । तदानीं मगधादिषु पूर्वीयदेशेषु बौद्धानामतिप्राबल्यमासीत्, नानास्थलेषु विविधानि पाठालयानि तथागतमतमन्तव्याध्यायका ऽध्यापकबहुलानि सुविश्रुतान्यभूवन्, येषामन्यतमत् तादृशविशालतामाबिभ, यत्र पञ्चदश पाठकोपाध्यायानां शतान्यध्यापकतया, तावन्ति च्छात्राणां सहस्राणि च विद्याधिजिगांसक्तया वसतां श्रूयन्ते । हंस परमहंसयोरपि तत्र गत्वा तपनबन्धुतर्कशास्त्राधिजिगमिषा प्रादुरभूत् । यद्यपि 'हरिभद्रसूरिं स्वयं सुगततर्काम्बुनिधिपारदृश्वाऽऽसीत्' इति तत्प्रणीतानेकान्तजयपताकादिभ्य प्रखरग्रन्थेभ्य, येषु प्रत्येकं प्रायस्त्रिपादभागो ग्रन्थ शाक्यतर्कविषय एवाधिकृतो विलोक्यते, अन्येभ्यश्चापि तत्पराभूतप्रगल्भबौद्धाचार्यादिवृत्तान्तप्रभृतिप्रमाणेभ्यो निःसंशयं विनिरणैष्महि, तथापि 'अपरिचितवस्तूनामणीयसामपि तत्त्वत, महत्तया श्रुतिपथमवतीर्णाना तादृश एव कश्चिदनिर्वचनीयोऽस्ति महिमा, येन विनाकृत्य तत्साक्षात्कारं, नान्येन तत शतशोऽप्युत्तमेन केनापि ज्ञातेन दृष्टेन वा पदार्थेन, तज्जिज्ञासाया दिदृक्षाया वोत्कण्ठा निपेद्धुं तीर्यते सा-

"विवृत च याकिनीमहत्तरासूनुश्रीहरिभद्राचार्यै" ।

अनेकान्तजयपताकायामपि,-

"कृतिर्धर्मतो याकिनीमहत्तरासूनोराचार्यहरिभद्रस्य" ।

आवश्यकनिर्युक्तिटीकायां च,-

"कृति सिताम्बराचार्यजिनभटनिगदानुसारिणो विद्याधरकुलतिलकाचार्यजिनदत्तशिष्यसाधर्म्य(स्य धर्म ?)तो जाइणीमहत्तरासूनोरल्पमतेराचार्यहरिभद्रस्य" । (Peterson 3rd Report Page 202)

ललितविस्तरायां चापि,-

"कृतिर्धर्मतो याकिनीमहत्तरासूनोराचार्यहरिभद्रस्य" इति ।

अन्येऽपि पूर्वसूरयस्त तत्त्वेन (याकिनीपुत्रत्वेन) निजेषु ग्रन्थेषूपलक्षयन्ति, तथा च मुनिचन्द्रसूरयो ललितविस्तरापञ्जिकायाम्-"याकिनीमहत्तरासूनोराचार्यहरिभद्रस्य", राजशेखरसूरय प्रबन्धकोषे-"याकिनीधर्मसूनु" इति, हर्षनन्दनश्च मध्याह्नव्याख्याने-"अत्रैव चोरद्वयोदाहरण याकिनीमहत्तराधर्मपुत्रश्रीजिनभट्टा (?टा) चार्यशिष्यश्रीहरिभद्रसूरिभिरुपदेशपदग्रन्थे गाथात्रयेण सूत्रितम्" इति ।

धारणैर्जैनैः' अयमेव नियमः, दुरुल्लंघ्यो भवितव्यतानियोगो वा तयोरभ्यापतितः, कथमन्यथा गुरुणा निमित्तशास्त्रादशुभफलमुदर्कमोत्क्षमाणेन निषिद्धावपि, निपुणावपि, कदाचिदनवज्ञातगुरुवचनावपि तौ न समर्थौ बभूवतुस्तमभिलापमन्यथाकर्तुम्, नवा प्रगुणीबभूवतुर्गुरुनिदेशमादर्तुम् ।

समारम्भातां तत्र आहोपुरुषिकामग्रेकृत्य झटिति प्रस्थातुम्, उपालम्भातामचिरादप्रतिबद्धविहारैर्जिगमिषितं नगरम्, उपाक्रंसातां च विनिर्मिताहेन्मुनिवेषविगोपनौ तौ पाठकप्रकाण्डाभ्यर्णे तर्कोद्धुराणि सुगतसुतीयशास्त्राणि समभ्यसितुम् । नितान्तदुर्गमाण्यपि, मतिमन्मतल्लिकाभिरपि दुरवगाहाणि च तानि तीक्ष्णप्रेक्षापाटवौ तौ, अन्तरेणैव संक्लेशलेशम्, अग्रहिषाताम्, समग्रहिषातां च दृढतमावस्थापन्नयाऽविच्युत्याऽऽत्मनि धारणया; न केवलमेतावत्, प्रत्येकं पत्रद्वय्यामुदलेखिष्टामपि सुसूक्ष्मतर्कव्यापिना निजेन प्रतिभाप्राबल्येन ताथागततनयविहितस्य जिनपतिमतखण्डनस्य सततगहनाभिरर्थ च सन्न्यायानुयायिनीभिर्युक्तिभिः प्रतिविधानम् । प्रवरपवमानेन गुर्वाज्ञोल्लङ्घनपापेनेवाविर्भूतेन दूरमुत्सारिता सा दलोभयी केनापि तत्रत्येन समादाय पाठकपार्श्वमुपस्थापिता । सोऽपि तत्रोपनिबद्धं बुद्धसिद्धान्तबाधाधायिनं स्वप्रतिपक्षभूतमर्हद्राद्धान्तनिर्दोषतापोषकं च समर्थहेतुसंतानं निपुणतरमवलोकमानो विस्मयापन्नमानसोऽर्हन्मतानुरागान्यथानुपपद्यमानमेनमुल्लेखमनुमाय, तदुल्लेखकं पुनरर्थापत्त्या पिपठिषुभावेन पाठालयेऽत्र स्थितिमातन्वन्तं छन्नवेषधारिणमर्हदुपासकं विनिश्चित्य विवेकेन तदन्वेषणोपायममार्गयत् । प्राप्तौपयिकश्च स्वशिष्यैर्निजाभिमुखागमनद्वारमध्ये जिनेशबिम्बमालीलिखत्, आदिक्षच्च कांश्चन च्छन्नतया संस्थाय वर्तिष्यमाणोदन्तकथापनायै । क्रमशस्तत्राजग्मिवांसौ हंस-परमहंसौ तदवलोक्य भविष्यद्विकटसंकटप्रकटचिह्नमिदमवधार्यापि, मरणान्तकष्टादपि जिनाशातनाऽसातं बहु मन्यमानौ, तामेव जिनपतिप्रतिकृतिं खटिनीखण्डेन कल्पितोपवीतां बुद्धबिम्बाकारां विधाय, निधाय च तच्छिरसि विगतभयं निजचरणौ, अगमतां गुरुपार्श्वे पाठमादातुम् । चरपुरुषैरिव प्रच्छन्नच्छात्रैर्निखिलमपि तद्विलसितं गुरवे तयोरसमक्षं न्यवेदि । स च सकृत् तावदर्हदुपासकत्वेन निस्संशयं सुगतद्विषौ विनिश्चित्यापि निर्णयदार्ढ्यार्थमन्यदपि परीक्षणमाकाङ्क्षन्, ततोऽपि विहिताद् हस्तावलम्बसदृशसंवादमासादयन्, विजृम्भितान्तःकोपस्तयोस्तथा व्यापादनाय संकल्पमकार्षीत्, यथा परदेशीयच्छात्रकदर्थनाविर्भूत आत्मीयायशोऽन्धकारसमुदयो न समुदयमाप्नुयात् । निगूढमप्यमुं तदभिप्रायं प्रज्ञाचक्षुषा प्रथमत एव प्रबुबुधानौ तौ, क्षणमात्रासिकामपि तत्र बहलामकुशलामवलोक्य

मानौ सामयिकचातुर्यं व्यापृत्याभि निजपुस्तभेदन प्रच्छन्नतया प्रस्थानमाशु समसूत्रयताम्। स आततदुदन्तविज्ञानमात्रो निस्त्रिंशहृदय स बौद्धाध्यापक स्वदैवतमस्तकन्यस्तचरणयुगलादिनिमित्ताना ध्यायन् प्रकटितसाटोपकोपप्रचण्डज्वालाजाल स्वसधर्मिणस्तत्त्यभूमिभूत प्रभूतभटांस्तद्विनाशाय पृष्ठानुयायिन प्रणिनाय। सुदूरासन्नमुपागतान् योधाननुपलक्ष्य हंस कनीयास बान्धव शरणागतैकवत्सलस्य सविधस्थपत्तनाधीशस्य सूरपालाह्वस्य पृथिवीपते पार्श्वे झगिति प्रयातुम्, ततश्च तत्सहायतया गुरुपार्श्वे प्रयाय निजाविनयविहिताचमाननापराध क्षमयितुमादिश्य, सहस्रयोधी प्रतिपन्थिभि समं संगरसंगतोऽरातिसैन्यमत्रासमासूत्रयन् प्रचुरशरोपनिपातेन नितरां जर्जरिततनुरुर्वराया पेतिवानकरुणरिपुजनैर्निधनमानायितो नाकनारीमनोरथानपूरि।

ज्यायसो यन्त्रनस्य निदेश शिरोधृतमीचक्रिवांस्त्वरिततरपदप्रचारेण निर्दिष्टनामधेय धरित्रीश्वर शरणीचकार, परिपन्थिभटान् फाल्गुनभयपृष्ठधाविन इव दुष्टश्वापदाननुपदमायातान्, तदासादनाय व्यापादनाय च सामादिनीतिप्रधानान् प्रभूतानप्यनुलोमप्रतिलोमोपायान् प्रयुक्तवतोऽपि शरणायातरक्षोपक्षेपदीक्षितेन क्षितिरक्षिणाऽवकेशिन इव फलवन्ध्यत्वमुपनीतान्, वञ्चनाचञ्चुचातुरीके कैश्चित् पुनर्बौद्धाग्रिमैर्विचक्षणेन तेन नरपतिना कथमपि प्रतिपन्ने पराभूतवधप्रतिश्रवे प्रमाणवादेऽपि विजयश्रियमाशिश्रियाण, ततश्चित्रकूटं प्रति विहितप्रस्थान, भूयोऽपि पृष्ठावलग्नान् प्रतिपक्षिण सामयिककौशलेन विप्रतेरिवान्, महता भाग्योदयेन पवननिर्दहनेवादभ्रदभ्रचक्र विप्रस्थात विघट्य समगस्त कथञ्चन गुरुचरणारविन्दमालिङ्गयितु परमहंस। हरिभद्रसूरिणा स्नेहभरेण परिरब्धश्च स्वीयाविनयापगरदुरितमिव प्रक्षालयन् निर्मुक्तमुक्तोपमाश्रुपय पात स प्रस्थानत प्रभृति वृत्तान्तमुपक्रममाणो परमहान्तचरकथावसानावसानमेव गद् ब्रुवन् जायमानगुरुतरदुःखभरेण स्थानमनवाप्नुवतेव स्फुटितहृदय क्षणमपि भ्रातृवियोगमसहमान इव हंसमन्वयासीत्[१]।

---

१ राजशेखरसूरयस्तु स्वविरचित प्रबन्धकोषे–"रेखात्रयाङ्कमन्त्कण्ठ चक्रे। 'बुद्धोऽय जात' इति कृत्वोपरि पादो दत्त। उपरि चटितौ। गुरुणा दृष्टौ। विषण्णौ तौ गुरोरस्य छायापरावर्तं दृष्ट्वा तत्कृतवन्तत्कृतमेव मया जठरपीडामिषेण ततो निरक्रामताम्। कपाटिका लात्वा गतौ तौ चिराद् नायातौ विलोकापितौ न स्त। राजाग्रे कथितम्–'सितपटौ तस्करूपौ तत्र रात्रा यात'। कपाटिकानयनाय तत्पृष्ठे सैन्यमन्वगात्। दधर्षी द्वावपि सहस्रयोधौ तौ। ताभ्यां निहत राजसैन्यम्।

विमलकुलोपलब्धात्मलाभयोर्विशुद्धश्रद्धानादिसिद्धिपद्धतिनिबद्ध-बुद्धिकयोर्विपक्षिप्तपरिपत्परिभावकप्रबलप्रातिभप्रागल्भ्यमाबिभ्रतोर्भागिनेययोस्तयोरेकहेलयैव त्रिदशावासमासदनोस्तांस्तान् निरुपमगुणान् संस्मरतः सूरिवर्यस्य विभावितासारसंसारस्वरूपस्यापि महती शोकसन्ततिराविरासीत्, प्रादुरासीच्च प्रसङ्गस्यास्य सूत्रधारीभूयमाभेजानानां नितान्तनिस्त्रिंशाशयानां शाक्यानामुपरि, विज्ञातसर्वज्ञागमरहस्यस्यापि तस्य सततशीतलस्वभावेऽपि मानसे, अतिवृष्ट इव चन्दनविटपिनि, दारुणः कोपपावकः ।

लब्धास्पदमुद्भटकोपावेशमनिरुध्य, प्रत्युत हव्यवाहमिव हविषा, अन्यत्रोपयोगिनापि रिपुकुलमूलोन्मूलन-शल्योत्पाटनादिनीतिवाक्यकदम्बकेन यथा तथा स्वाकूतानुकूलीकृतेन विवर्ध्य विगतसंयमानुकम्पो हरिभद्राचार्यः शत्रूयितसुगताचार्यनिकन्दनं लक्षीकृत्य कथिततथागतपराभूत्यर्थनिजगमनं गुरुमभिपृच्छ्य, असहाय एवारचितप्रवासः सूरपालक्षितिपालस्य राजधानीमवाप्य द्रुततरं नराधीशमभिगम्य वितीर्णार्हत्समयसंगताशीर्वादः कृतज्ञतानिवेदनपूर्वकं निजागमनप्रयोजनमेवमजिज्ञपत् ;–"राजन् ! शरणागतवज्रपञ्जरतामाकलयता, मम परमहंसाख्यमन्तेवासिनं परिरक्षता, तदर्थं च लक्षसंख्यमपि प्रतिपक्षिसौगतराजसैन्यमवगणयता भवता ख्यापितं स्वस्य विस्मयावहं नीत्यनुरक्तत्वम्, प्रशस्यतमं साहसिक्यम्, अनन्यसदृशं च भुजोर्जस्वित्वम्; बाढं तद् विश्वसिमि, शास्त्रवादे बौद्धबुद्धान् विद्वज्जनाभिमतरीत्या विजेतुमिहागतस्य मेऽनुरूपं प्रबन्धं विधाय साहाय्यमाचरिष्यसि" इति । वाचमिमां कर्णपुटेन निपीय वाचंयमशक्तिमिव परीक्षितुं पृथिवीपतिरिदमुचितवचनसंदर्भमभ्यधात्—"कर्तव्यमिदमस्माकम्, भवद्विजये हि वयमेव विजिष्णवः; परमाशङ्केयं बाधते मम मानसं यदुत—'कथमिव महाबुद्धयः शलभा इव बहवो भवद्भिर्विजेतुं शक्याः शाक्याचार्याः ? अस्ति वा काचिद् युष्माकं तथाविधा शक्तिर्यया भवतामजय्यतायामेव शक्नोमि विनिश्चयं कर्तुम् ? ।' निर्वचनेऽस्य

उद्वृत्तनष्टैरुपराजं गत्वा कथित तत्तेजः । पुनर्बहुसैन्यप्रेषः । दृष्टिमेलापकः । युद्धमेकः करोति । अपरः कपरिकापाणिर्नष्टः । हंसस्य शिरश्छित्त्वा राज्ञे दर्शितं तैः । तेनापि गुरवे दत्तम् । गुरुराह–'किमनेन ? कपरिकामानय' । आयाता भटाः । रात्रौ चित्रकूटे प्राकारकपाटयोर्दत्तयोस्तदासन्ने सुप्तस्य परमहंसस्य शिरश्छित्त्वा तैस्तत्रार्पितम् । तेषां बौद्धानां तत्सूरेश्च संतोषः । प्रातः श्रीहरिभद्रसूरिभिः शिष्यकबन्धो दृष्टः" इति प्रत्यपीपदन् । "भोटदेशे बौद्धाचार्यसमीपे तौ गतौ, द्वावपीमौ च बौद्धैर्मारितौ" इति कश्चित् । (Peterson Rep. 3 P. XXXV.)

पर्यनुयोगस्य, वाचयमाधीशेन निजस्याम्बिकासांनिध्ये प्रतिपादिते ताथागताना निस्त्रिंशता बाढ विज्ञातपूर्वी नृपतिस्तान् शिक्षयितु-मयावसरमात्मान विनिर्णयमान सहर्षं सूर्यमीप्सित प्रतिपद्य वाक्-शक्तिविशारद दूतमेक गौडपुरे प्राहिणोत् । तत प्रोषितस्त्वरित तत्पु-रमानुवन् दूत सुगतसुतगुरुमानस्य नरनाथाशयानुसार निपुणप्र-पञ्च वचननिचयमिदमुच्चचार, "तत्रभवति भवति भूयिष्ठभक्तिको भूमान् सूरपालो मम वाचा भवन्तमिद विज्ञपयति, दशनलदर्शना-रातितामादधान आर्हतशासन निषेवमाण कश्चिद् विपश्चिद् मम नगरमध्यासीन सन्ननवद्यविवादविद्याविशारदमात्मानमभिमन्यते, न मन्यते च तृणाय समस्तानपि भूमण्डलस्थान् प्रज्ञालान्, विशेषतश्च बौद्धाचार्यान्, अत्रभवति च भवति भुवनत्रयविश्रुतेऽपि भवति, अवा-ङ्मुखाधार्यदस्माक यद्यापि वादिशब्द श्रुतिसचार न जहाति, ततस्तथा कर्तव्य कर्तव्यतामिदानीमश्नुते यथा स्वयमयमवाप्तपराजयो निनष्टप्राणतामाविशेत्, नापीत्थमन्य कश्चन कदाचन प्रादुर्भावमाश्र-येत्" इति । कर्णावतीर्णमिद प्रणीय प्रणीतगर्वसवस्वाङ्गीकार इव बुद्धप्रबुद्धधुरन्धर स साक्षेपोत्क्षेपा वाणीमिमामजल्पत, "तिरस्कृ-तदृत्स्नविषयवर्तिविबुधव्रातस्य मम पुर कोऽय नवपठित इव जिन-मतविशारदोऽपि वावदूको भविता ? नूनमनल्पविकल्पजल्पनकल्प-नाभिरल्पेनैव कालेन चालायमानमिव मा तन्मानविनाशने विनि-श्चिनुष्वमेनम् । पर स वदावद स्वपराजये स्वयं परासुता प्रतिज्ञास्यते नवा ? । प्रतिजानीत चेत्, सिद्धमवश्यमस्मत्समीहितम्, मत्कर्तृ-कस्य तत्पराभवस्य नियमेन जनिष्यमाणतया तन्निधनस्य तत्प्रतिज्ञयै-वाभिमुखीकरिष्यमाणत्वात् । नो चेत्, कथ स नामावशेषतामापाद-नीय, पराजयमात्रस्य तद्व्याप्यत्वाद्यभावेन तदापादयितुमपर्याप्त त्वात् ? इति त्वमेव प्रवरतरमन्विष्य तादृश किञ्चनौपयिकमाख्याहि, येन तत्पराभूतस्य तस्य नियततया निधन विनिश्चिनुयाम्" इति । वाक्प्रपञ्चविचक्षणस्तदुक्तमालोच्य समयोचितमभीप्सितार्थसदर्भग-र्भमाविर्भावितवान् निर्वचनमेतद् दौत्यभृतामग्रणी,—"भगवन् ! धीधिधैर्मयत पुर कथमिवामुष्य मम मन्दधियो जनस्य गिर प्रवृत्ति-श्चाग्मिमाणमार्हन् ? यद्वा, भवत्पदारविन्दप्रभावतो न किञ्चिद् दुष्करमिदमवधार्ये; मम मतौ स्फुरत्ययमविघ्नकार्यनिर्वर्तकस्तदुपाय, कर्तव्यताया त्वस्य भवन्त एव प्रमाणम् । स चायम्, याचन्ता भूमि-मन्त भवन्त "विवादे य पराभवमनुभवतु, निष्टप्ततैलकुण्डे स्वय स प्रवेशमनुतिष्ठतु' इति पणम् । स्वकार्यदक्षा स्वश्लाघाकारी च कुतो ऽपि प्रतिनाप्य इष्टमना शाक्याचार्यस्तत्प्रगस प्रणोद, निरणैष्ट च तथा विधातुम । चतुरमतिदूतोऽपि तच्चिकम द्रढीकर्तुकाम प्रकाममग्र-

वीत्, "पुनरपि धार्ष्ट्यमवलम्ब्य विज्ञपयामि किञ्चिद् भगवत्पादौ, यद् हिरण्यगर्भेयं वसुन्धरा, संभवति चेदिह, जिनमतेऽपि कश्चिदतिशयितमनिरभियुक्तोऽस्तितामादधीत, यतो मा भूद् भवतामवमानना। यद्यपि गगनाङ्गणोद्भूतारविन्दमकरन्दायमाणमलविदं परिकल्पनं मे, तथापि बाढमवधारणीयमिदं यदुत तत्रभवत्सु विजयिषु वयं सनाथतामाकलयामः" इति। शङ्कितनिजविजयमिव तमनुमाय सौगतगुरुः समादधात्, "आः किमेतद् भयं भवद्धृदयमनुरुणद्धि? चित्रमदो यच्चिरनिषेवितेऽपि मयि परेण विजेयताया भ्रममुद्वहसि, क इव वाचस्पतिप्रतिमोऽपि प्राप्तरूपो मतङ्गज इव सिंहस्येव मम पुरः प्रगल्भः? यदि तन्मदगदं न प्रतिकुर्वीय, स्वनामधेयमप्यहं तर्हि नाङ्गीकुर्वीय, किमत्राप्रस्तुतेनेव स्वयमभिष्टुतेन बहुना, अचिरेण भविष्यतेदंसंवादिना तत्पराजयेनैव निर्णेष्यसि सर्वम्; तत् प्रतिष्ठस्व शीघ्रम्, प्रशाधि च पुरपुतेः पुरतो वादिपौरुषानलपटलादभ्राभ्रप्रतिमप्रतिभस्य मे वाचम्, वादिलाभाकृष्टास्तत्रानुपदमेव समागच्छामः' इति। एवं खगमननगकुसुमोद्गमप्रतिनिभं तद्वचनं निशम्य मुदितमनसो दौत्यकरो निजं पुरमायातः संविहितसुगतमतपतिव्यतिकरेण फलेग्रहिणा महीपतिमवर्धत्। बौद्धाचार्योऽपि विपुलविद्वद्वृन्दार्चितचरणारविन्दस्त्रिचतुरदिनाभ्यन्तरमेव तत्रागत्य प्राश्निकनिर्णीतपणेन वादमुद्रामासूत्रयत्, स्वशासनरक्षिणीं तारानामां देवीमपि गर्वेण विस्मृत्य. स्मृतामपि वा सद्यःशत्रुसंघातविघातिनीं तां विजानन्नसंस्मृत्य, चतुरङ्गमण्डितायां वादपरिषदि समेत्य च वादमुपचिक्रंसमानः पूर्वपक्षं क्षणक्षयसिद्धान्तसिद्धिविधायिनमग्रहीत्। "यत् सत् तत् क्षणिकम्, यथा जलधरः, सच्च विश्वं विश्वम्' इत्यादि तत्साधनाय प्रमाणजालमुपन्यास्थत्, पक्षधर्मत्वादितल्लिङ्गलक्षणानि समर्थयंस्तत्रासिद्धतादीनि हेतुदूषणानि निरास्थत्, समापच्च वादिकर्तव्यम्। प्रतिवादितां परिगृह्य हरिभद्रसूरिरपि परपक्षदूषण-स्वपक्षसिद्धिलक्षणं निरुपचरितविजयस्वरूपमनुसरन्, तदुक्तमनूद्यानैकान्तिकत्वादिभिरपरिहर्तव्यनिबिडैर्दूषणैस्तत्साधनं निराकृत्य, निरन्वयक्षणिकसिद्धान्तमपि, उत्तमर्णाधमर्णनादिव्यवहाराभावस्य लौकिकस्य, कृतनाशाविहितभोगप्रसङ्गप्रभृतेर्लोकोत्तरस्य, स्मृति-प्रत्यभिज्ञानाभावादेश्च तदुभयस्य वज्रप्रहारायमाणस्य दूषणसमुदयस्यासञ्जनेन भृशं विदूष्य, विभूष्य च विपुलोपपत्तिभिरनेकान्तदर्शनम्, निरुत्तरीचकार सौगताचार्यम्। मौनमाशिश्रियाणश्च सः "पराभूतः' इति सभ्यादिभिर्विदितः पणोपनतं तप्ततैलकुण्डमाविक्षत्। एवं प्रतिदिनं निर्दिष्टशपथानुसारमेकैको बौद्धो बुद्धधौरेयो हरिभद्रसूरिणा निजानन्यपारिढत्यबलेन पराभूतिं लम्भितः कथावशेषतामवापत्। यावत् पञ्चषास्तां

स्तेन विजितान् पणनशेन यमसद्म समाश्रितांश्चानुभूतवति सौगतपक्षे मूर्तिमानिव शोकः समुद्भूत्। सर्वैरपि तैस्ताथागतैः सहस्य शासनाधिष्ठायिनी सस्मृत्य प्रत्यक्षीकृता महतोपालम्भेन च निजान्ववाय विनाशनोदासीनतानिबन्धनमनुयुक्ता निर्दोषहस परमहसव्यापादन-पातकविपाकमेनमुपतस्थिवासमुपदिशन्ती कथमपीत कर्तव्यताविमूढै कुशलपथनिर्देशमभ्यर्थिता हरिभद्रसूरिणा सह विवाद निषेधन्ती स्वस्थानगमनमादिक्षत्। ततो देवीवागनुसारेण सर्वेऽपि सौगतविशारदा निजनिजमावासमयासिषु, कटुकफलमपरच्छात्रविहननमुपगम्य मनसापि तत् प्रत्याख्यश्च। इयतापि तस्य सूरेरुत्कटो कोप वह्निर्नोपनान्तिमशिश्रियत्, यावतान्यैरपीदृशैर्नीतिपथानुगामिभि प्रकारैस्ताथागतविनाशमचिकीर्षत्।

इतश्च जिनभट्टसूरिर्निजेऽपि विनेये क्रोधतनूनपाद्विस्फूर्जितमीदृश निशम्य करुणापरीतचेतास्तदुपकृतये मृदुवचनविधिमनुशिष्य शिष्यद्वितयीं समरादित्यचरित्रबीजभूतया गाथात्रितय्या, अपरया चान्विता हरिभद्रसूरिनिकटमजीगमत्। यतिनावपि द्राक् सूरपालोर्वरापालपत्तनमवाप्य व्यासयशस सूरिमुपगत्य गुरुसदिष्टमुपदिशन्तौ प्रतिघविपतरुफलोदाहारिणीना गाथानामवधारणे गुरुनिदेशमचकथताम्। ताश्चेमा,—

> "गुणसेण अग्गिसम्मा सीहाणदा य तह पिआपुत्ता।
> सिहि जालिणि माइसुआ धण धणसिरिओ य पइ भज्जा॥१॥
> जय-विजया य सहोअर धरणो लच्छी य तहप्पई भज्जा।
> सेण विसेणा पित्तियउत्ता जम्मम्मि सत्तमए॥२॥
> गुणचद-वाणमतर समराइच्च गिरिसेणपाणो य।
> एगस्स तओ मुक्खोऽणतो अण्णस्स ससारो॥३॥"

---

१ गुणसेनाऽग्निशर्माणौ सिंहाऽऽनन्दौ तथा पितापुत्रौ।
शिखी जालिनी मातासुतौ धन्यो धन्यश्रीश्च पतिर्भार्या॥१॥
जय विजयौ च सहोदरौ धरणो लक्ष्मीश्च तथा पतिर्भार्या।
सेन विषेणौ पितृव्यपुत्रौ जन्मनि सप्तमके॥२॥
गुणचन्द्र-वानमन्तरौ समरादित्यो गिरिषेणप्राणश्च।
एकस्य ततो मोक्षोऽनन्तो द्वितीयस्य ससार॥३॥

अथमत्र भाव –(१) गुणसेननाम्ना विश्रुत कश्चिद् नरपति कस्मिंश्चिद् नगरे, कदाचित् काले, वसुन्धराम वशात्। तस्मिन्नेव पत्तनेऽग्निशर्माभिधान कोऽपि तापसो माम मासमुपवसन्नवात्सीत्। उग्रतपस्वित्वेन तत्र स ससलेऽपि पुरभेदने प्रसिद्धिमभजत्। एकदा नरपतिस्त मासोपवा-

सिनं पारणकाय न्यममन्त्रत् । सोऽपि तदङ्गीकृत्य प्राप्ते पारणकदिने नृपतिप्रासादमगमत्, परं राज्ञस्तद्विस्मृततया स तत्र प्रवेशमाधातुं पारणकं च विधातुं नाशकत् । ततः प्रतीहारनिरुद्धः प्रत्यावृत्तः स्वनियममनुसृत्यान्यत्र पारणकमकृत्वैवापरं मासोपवासव्रतमारभत । अनुस्मृततद्धंसनिकरेण महीपुरन्दरेण भृशमनुतापमातन्वता स्वापराधं निन्दता क्षमितस्तपस्वी पुनर्निमन्त्रितः कुतश्चिद् निमित्तविशेषादसंजातपारणकविधिः क्षुधित एव प्रागिव प्रत्यावर्तिष्ट । पुनरप्येवमेव धराधवेनाचरितस्तत एव हेतोस्तादृश एव प्रतिन्यवर्तत । विस्फूर्जत्क्रोधधूमध्वजश्च स तापसो विनयावनतमपि याचमानमपि च क्षमां, क्षमापतिं प्रणिजिघांसुर्भूयोऽन्तर्वैरिभावमन्वभान्तर्सात्, अकार्षीच्च ततो 'यदि स्याद् मे तपसः फलम्, राजानमेनं परभवेऽपि व्यापादयितुं प्रभविष्णुर्भवेयम्' इति निदानम् । (२) एवं सकोप एवायुःक्षये ततश्च्युतोऽग्निशर्मा भुवनपतिनिकाये देवभूयमभविष्ट । राजापि गुणसेनो निर्मायान्तःकरणो निर्माय यथाशक्ति धर्मकृत्यं सौधर्मदेवलोकमभूषयत । देवलोकात् कालं कृत्वा गुणसेनजीवः सिंहराजाह्वः क्षितीशः समजनि, अग्निशर्मा च तस्यानन्दाख्यपुत्रत्वेनोदपादि । स च पूर्वानुवृत्तवैरेणात्र पित्रीभूतमपि सिंहराजमवधीत् । (३) ततः स्वस्वकर्मानुकूलमग्निशर्म-गुणसेनात्मानावनुक्रमं नरकं स्वर्गं चाधिगत्य ततश्च्युतौ जालिनी-शिखिनामानौ मातापुत्रभावेन समुदपत्साताम् । इहापि प्राक्तनकर्मानुभावेन माता सुतं विषप्रयोगतः परासुतामनैषीत् । (४) तदनन्तरं गुणसेनः पञ्चमं त्रिदिवमारुह्य धन्याह्वयेन श्रेष्ठित्वेन प्रादुरभूत्, अग्निशर्मा च द्वितीयनिरयमधिष्ठाय तत्स्त्रीत्वेन 'धन्यश्री' इति नाम्ना जनुर्गृहीत्वा प्राच्यवैरेण पतिं व्यपीपदत् ॥ १ ॥ (५) ततो गुणसेनजीवः सप्तमं त्रिविष्टपकल्पमध्यरुक्षत्, अग्निशर्मा पुनस्तृतीयस्यामथ पृथिव्यां प्राविक्षत् । द्वावपि ततो मनुष्यजन्मनि जय-विजयाभिधानाभ्यां सहोदर्यभूताम् । एतस्मिन्नपि भवे तत एव प्राचीननिमित्ताद् विजयो जयमाजघान । (६) गुणसेनजीवो जयभवाद् मृतिमवाप्तो नवमकल्पे स्वर्गसंपदः परिभुज्य धरणाख्यः श्रेष्ठी बभूवान् अग्निशर्मणा ततश्चतुर्थश्वभ्रविपदः परिषह्य जातवत्या लक्ष्मीनाम्न्या तद्भार्यया प्राचिकाऽरातिभावतो निरणाशि । (७) ततश्च च्युतो द्वादशे स्वर्लोके गुणसेनजीवः, पञ्चमनरके चाग्निशर्मात्मा क्रमशः सुख-दुःखे अनुभूयाविवक्षितापान्तरालदेव-नारकभवे सप्तमे मनुष्यजन्मनि सेन-विषेणनामानौ पितृव्यपुत्रतया समजनिषाताम् । अत्रापि विषमोदर्केणानुबद्धकोपेन विषेणेव विषेणः सेनं व्यपीपदत् ॥२॥ (८) सेनभवाद् गीर्वाणभोगभोजीभूय गुणचन्द्रनामविद्याधरीभूयमापन्नं गुणसेनात्मानम्, अग्निशर्मा विषेणजन्म परि-

"जइ जलइ जल लोए कुसत्थपवणाहओ कसायग्गी ।
त जुत्त, न जिणवयणअमियसित्तोवि पज्जलसि ॥ १ ॥"

रहस्यमासा विचार्य गुणसेनदवानलकल्प दारुणविपाक जन्मान्तरानुबन्धिन क्रोधमवबोधन्, तदायत्तमात्मान च विज्ञाय भृशमनुतप्तमनास्तत्क्षणमेव नृपतिमभिपृच्छय गुरोर्महोपकारितामामनन्नविलम्बित गुरुचरणौ न्यपतत्, दुष्कृतमल च प्रायश्चित्तेन व्यशूशुधत्।

केचित् पुनरत्र 'परमहसोदन्तानन्तर प्रकटितप्रतिघप्रसरज्वालो हरिभद्रसूरिराकर्षणमन्त्रविद्यया चत्वारिंशदधिका चतुर्दशशतीं बौद्धपण्डितान् गगनमार्गेण विकृष्य तप्ततैलकटाहे प्रचिक्षिप्सन् यावद् निहन्तुमुद्यतोऽभवत्, तदानीं गुरुभिस्तच्चिकीर्षितमुदर्कदारुणमवगतवद्भिस्तदुपशमसमर्थानि मृदुललितवचनानि, ताश्च समरादित्यवृत्तवर्णनप्रवणा प्रस्तुतोपयोगिनीर्गाथा निर्ग्रन्थयुगेन प्रेषिता , याभिरमृतनिषेकनिभाभिस्तत्कोपसतसलतिरपशान्तिमावहत्, स कल्पप्रायश्चित्ताय च तावत्सख्याकान् ग्रन्थान् निर्मातु सूरि. प्रत्यज्ञास्त ' इति निवेदयन्ति ।

पूर्वोदमपापविपाकवशेन षष्ठनिरयनिलयातिथीभूय मर्त्यजन्मासाद्य ततो वानमन्तरजातीयक्षुद्रदेवभूय गतोऽप्यनुवृत्तवैरता पूर्वीयपरिपन्थिभावेन समपीपिडत् । (९) तत शुभध्यानत प्रच्युत्य गुणसेनचेतनोऽनुत्तरेऽनुत्तरविमानेऽपश्चिमां त्रिदशसपदमनुभवितुमुदपादि, अग्निशर्मात्मा च ततो विहितान्तरालनरजन्मा सप्तमे नरके दु सस्य परा काष्ठामनिच्छयापि सचीर्णदुरितप्रेरितो भोक्तुमाविक्षत् । गुणसेनजीव स्वर्गादुद्वृत्त समरादित्यनाम्ना क्षितिरक्षी सजात , अग्निशर्मा च निरयाद् निर्गतश्चाण्डालडिम्भो गिरिषेणाह्वयाऽभवत् । अस्मिन् भवे समरादित्यो राजर्षिर्भूत्वा स्वसवेदैकान्तिकाऽऽत्यन्तिकसुखास्पद मोक्षमुपजगन्वान्, श्वपाकरूपोत्पन्नोऽग्निशर्मजीवस्य कोपातिविषमफलदृष्टान्तीभवन्ननन्त काल ससारारण्य पर्यटीत् ॥

१ यदि ज्वलति ज्वलल्लोके कुशास्त्रपवनाहत कषायाग्नि ।
तद् युक्तम्, न जिनवचनामृतसिक्तोऽपि प्रज्वलसि ॥ १ ॥

२ यथा चतुर्विंशतिप्रबन्धे राजशेखरसूरय , "कोप । तैलकटाहा कारिता । अग्निना तापित तैलम् । १४४० बौद्धा होतु मे आकृष्टा । गुरुभिर्ज्ञातो वृत्तान्त । साधू प्रहितौ । ताभ्यां गाथा दत्ता "गुण० । बोध । शान्ति । १४४० ग्रन्था प्रायश्चित्तपाद (?) कृता." इति । चतुरशीत्यधिके विरचितायां खरतरगच्छपट्टावल्यामभूतपूर्वमणिनिष्प्र क्षमाकल्याणमुनिना हरिभद्रसूरिप्रस्तावे-"तदैव पुन श्रीहरिभद्रसूरिर्बभूव ।

इदानीं दर्शितप्रसङ्गान्यचरितानुपलम्भेन सूरिनिर्मितग्रन्थपर्यालोचनमवसाथावसरम् । तत्र तत्प्रणीतप्रबन्धसंख्यायां मतत्रयमवगम्यते; केचित् 'चतुर्दश शतानि ग्रन्थानां प्राणायिषत' इति प्रत्यपीपदन्, 'चत्वारिंशदधिकानि तानि' इत्यपरे प्राचीकटन्, 'चतुश्चत्वारिंशदुत्तराणि चतुर्दश शतानि' इति चान्ये न्यवीविदन् । तत्राद्यं मन्तव्यं दर्श्यमानसूरयो क्षाप्यमानग्रन्थेषु नीचैर्निष्टङ्क्यमानोल्लेखैरभ्युपागच्छन्;—

(१) मुनिचन्द्रसूरयं उपदेशपदटीकायाम्,—"महत् प्रवचनवात्सल्यमवलम्ब्यमानश्चतुर्दश प्रकरणशतानि चकार" इति ।

(२) वादिदेवसूरयः स्याद्वादरत्नाकरे;—"प्रकरणचतुर्दशशती-

स च जात्या ब्राह्मणः सर्वशास्त्रपारगः सन् प्रतिज्ञां चक्रे, 'यदुक्तस्यार्थमहं न वेद्मि, तच्छिष्यो भवामि' इति । तत एकदा साध्वीमुखादेकां गाथां श्रुत्वा तदर्थमनवबुध्यमानः प्रतिज्ञावशात् साध्वीदर्शितगुरुसमीपे व्रतं जग्राह । जैनशास्त्राण्यपि सर्वाण्यधीत्याचार्यत्वं प्राप्तः । तस्य हंस-परमहंसनामानौ द्वौ शिष्यौ । परशासनग्रहणार्थं बौद्धाचार्यसमीपं गतौ । तत्राध्ययनं कृत्वा स्वपुस्तकं गृहीत्वा स्वस्थानं प्रत्यागच्छन्तौ तौ 'जिनौ' इति ज्ञात्वा पश्चादागतैर्बौद्धैर्मारितौ । अथैतत्स्वरूपं विज्ञाय कोपाक्रान्तेन गुरुणा तप्ततैलपूरितं कटाहं स्थापयित्वा मन्त्रबलाच्चतुश्चत्वारिंशदधिकचतुर्दशशतबौद्धा आकर्षिताः । तदानीं याकिनीमहत्तरावचनैः कोपादुपशान्तेन गुरुणा बौद्धा मुक्ताः । ततः पापशुद्ध्यर्थमाकर्षितबौद्धप्रमाणानि १४४४ पूजापञ्चाशकादिप्रकरणानि कृतानि । एवंविधा हरिभद्रसूरयो जाताः" इत्युल्लिखति स्म ।

१ स्याद्वादरत्नाकरप्रणेतॄणां जगद्विख्यातानां गणव्यवस्थायां 'रामचन्द्र'-इतिनाम्नां वादिदेवसूरीणामिमे गुरवः । ११७४ विक्रमसंवत्सरेऽयं ग्रन्थस्तैर्व्यरचि, इति स्वयं तैरेव प्रान्तभागविनिर्दिष्टादस्मात् श्लोकत्रयादवसीयते—

"प्रायस्तत्सर्वसंतानभक्तिमान् मुनिनायकः ।
अभूत् श्रीमुनिचन्द्राख्यस्तेनैषा विवृतिः कृता ॥ ५ ॥
प्रकृता श्रीनागपुरे समर्थिताणहिल्लपाटके नगरे ।
अब्धि-मुनि-रुद्रसंख्ये वहमाने वैक्रमे वर्षे ॥ ६ ॥
साहाय्यमत्र परमं कृतं विनेयेन रामचन्द्रेण ।
गणिना, लेखन-संशोधनादिना शेषशिष्यैः ॥ ७ ॥

२ मुनिचन्द्रसूरिशिष्यत्वेनामीषामपि स एव द्वादशशताब्दीरूपः समयः, अन्यथा निरुपचरितगुरुशिष्यभावानुपपत्तेः, अनेकप्रमाणैः सटीकप्रमाणनयतत्त्वालोकालङ्कारप्रस्तावनायामस्माभिरेतस्य प्रपञ्चितत्वाच्च ।

समुत्तुङ्गप्रासादपरम्परासूत्रणैकसूत्रधारैरगाधससारवारिधिनिमज्जज्जन्तुजातसमुत्तारणप्रवणप्रधानधर्मप्रवहणप्रवर्तनकर्णधारैर्भगवत्तीर्थकरप्रवचनावितथतत्त्वप्रबोधप्रसूतप्रवरप्रज्ञाप्रकाशतिरस्कृतसमस्ततीर्थिकचक्रप्रवादप्रचारैः प्रस्तुतनिरतिशयस्याद्वादविचारैः श्रीहरिभद्रसूरिभि "

(३) मुनिरत्नसूरयोऽममस्वामिचरित्रमहाकाव्ये प्रथमसर्गे,—

" स्तौमि श्रीहरिभद्र त येनार्हद्धीर्महत्तरा ।
चतुर्दशप्रकरणशत्याऽगोप्यत मातृवत् ॥ ९९ ॥

(४) श्रीप्रद्युम्नसूरय समरादित्यसक्षेपप्रशस्तौ,—

"यावद् ग्रन्थरथाश्चतुर्दशशती श्रीहारिभद्रा इमे
वर्तन्ते किल पारियात्रिकतया सिद्ध्यध्वयानेऽङ्गिनाम् ।
तावत् पुष्परथ स एष समरादित्यस्य मन्निर्मित
सक्षेपस्तदनु लव प्रचरतु क्रीडाकृते धीमताम् ॥ ६६ ॥"

(५) श्रीमुनिदेवसूरयः शान्तिनाथचरित्रे,—

---

१ एतद्विरचनावसरो ग्रन्थकर्त्रैव प्रशस्तावेव प्रत्यपादि—
"एतद् विक्रमतो द्विपञ्चदिनकृद्वर्षे कृत पत्तने
सम्यक् शोधितवान् नृपाक्षपटलाध्यक्ष कुमार कवि ।
सद्वैयाकरणाग्रणीर्विधिरुचि श्रीपूर्णपालो यश -
पालो बालकविस्तथा मणमहानन्दौ च सभ्याविमौ ॥ ३० ॥"

२ अदोविरचनानेहस "वर्षे वारिधिपक्षपक्षगणिते श्रीवर्धमानस्थितिश्चक्रेऽमु" इत्येतत्प्रशस्तिप्रान्तभागोल्लेखेन तत्कृदव १२२४ विक्रमवत्सररूप स्पष्टमाचष्ट ।

३ यत्तु Dr Peterson महाशय (in I Rep App P 4), समरादित्यसक्षेपप्रस्तावनाया Dr Jacobi पण्डितश्च
"यो वादीश्वरदेवसूरिसुगुरोर्मूलक्रमे सूरिणा
चक्रे श्रीमदनेन्दुना निजपदे तेनाप्रवृत्ताश्रिता ।
काव्ये श्रीमुनिदेवसूरिकविना श्रीशान्तिवृत्ते कृते
श्रीप्रद्युम्नमुनीन्दुना रुचिशुचि सर्गोऽगमत् सप्तम ॥४०३॥"

इति ग्रन्थप्रान्तप्रोक्तानुसारेण 'एतत्कर्ता देवसूरि' इति ज्ञापयत, तद् भ्रान्तमाभाति, मुनिदेवसूरीणामेव (न तु देवसूरीणाम्) एतत्प्रणेतृत्वात्, दर्शितपद्येऽपि तदर्थस्यैव लाभात्, सूरिविशेषणे सति मुनिविशेषणस्यानायबाधितत्वेन कल्पयितुमयुक्तत्वात् । एतत्प्रणयनसमयश्च प्रद्युम्नसूरिसमान, तेनैवैतच्छोधितत्वात् ।

"चतुर्दशशतग्रन्थग्रन्थनायासलालसम् ।
हारिभद्रं मनोहारिभद्रं भद्रं करोतु नः ॥ ४ ॥"

(६) प्रभाचन्द्रसूर्यः प्रभावकचरित्रे :—
"पुनरिह च शतानि मुग्रधीमान् प्रकरणसार्धंसहस्रमेव चक्रे ।
जिनसमयवरोपदेशरूपं ध्रुवमिति सन्ततिमेव तां च मेने ॥२०५॥"

(७) गुणरत्नसूर्यः षड्दर्शनसमुच्चयस्य तर्करहस्यदीपिकानाम्न्यां बृहद्वृत्तौ—"चतुर्दशशतसंख्यशास्त्ररचनाजनितजगज्जन्तुमहोपकारः श्रीहरिभद्रसूरिः" ।

(८) कुलमण्डनसूरयो विचारामृतसंग्रहे—"धर्मसंग्रहणी-अनेकान्तजयपताका-पञ्चवस्तुको-पदेशपद-लग्नशुद्धि-लोकतत्त्वनिर्णय-योगबिन्दु-धर्मबिन्दु-पञ्चाशक-षोडशका-ऽष्टकादिप्रकरणानि चतुर्दशशतमितानि...श्रीहरिभद्रसूरिभिर्विरचितानि" ।

---

१ यच्च निर्णयसागरीयप्रभावकचरिते तत्कर्तुः 'चन्द्रप्रभसूरि-' इति नाम प्रसेधितम्, तत् तत्संपादकस्य "श्रीचन्द्रप्रभसूरिपट्टसरसीहंसप्रभः श्रीप्रभाचन्द्रः सूरिरनेन" इति सुस्पष्टस्यापि प्रतिशृङ्गं विन्यस्तस्यापि च पद्यस्यानवबोधत एव । धर्मबिन्दुभाषान्तरकर्त्राऽपि सर्वत्र प्रभावकचरित्रकर्तृतया चन्द्रप्रभसूरिं निर्दिशताऽन्धानुसरणन्याय आचरितः ।

२ ग्रन्थनसमयं चास्य ग्रन्थकार एव तत्प्रशस्तौ
"वेदानलशिखिशशधरवर्षे चैत्रस्य धवलसप्तम्याम् ।
शुक्रे पुनर्वसुदिने संपूर्णं पूर्वर्षिचरितम् ॥ २२ ॥"
इति पद्येन १३३४ वर्षरूपं प्रत्यपीपदत् ।

३ एतदाचार्यसमयजिज्ञासायाः
"काले षड्-रस-पूर्ववत्सरमिते श्रीविक्रमार्काद् गते
गुर्वादेशवशाद् विमृश्य च सदा स्वान्योपकारं परम् ।
ग्रन्थं श्रीगुणरत्नसूरिरतनोत् प्रज्ञाविहीनोऽप्यमुं
निर्हेतूपकृतिप्रधानजननैः शोध्यस्त्वयं धीधनैः ॥ ६३ ॥"
इति तत्कृतक्रियारत्नसमुच्चयपद्यमेवोपशामकम् ।

४ ग्रन्थकार एवेदंग्रन्थग्रन्थनसमयमेवं विनिर्दिशति—
"निस्सीमातिशया जयन्ति सततं सौभाग्यभाग्याद्भुताः
सूरिश्रीगुरुदेवसुन्दरवरास्तेषां विनेयाणुकः ।
सूरिः श्रीकुलमण्डनोऽमृतमिव श्रीआगमाम्भोनिधे-
श्चक्रे चारुविचारसंग्रहमिमं रामाब्धिशक्राब्दके ॥ २ ॥"

(६) समयसुन्दरगणिशिष्य श्रीहर्षनन्दनगणिर्मध्याह्नव्याख्यानपद्धतौ[1]

"पालित्तो वृद्धवादी करिकुलतिलकः सिद्धसेनो दिवाकृद्
विद्यासिद्धस्तथार्यः खपुटगुरुरुमास्वातिको मल्लवादी।
सूरिः श्रीहारिभद्रः स्वपरसमयविद् बप्पभट्टिः प्रसिद्धः
सिद्धर्षिर्देवसूरिः कुमरनृपनतो हेमसूरिश्च जीयात्॥१॥"

इतीमं महर्षिकुलकनाम्नो ग्रन्थस्य श्लोकं व्याकुर्वन् हरिभद्रपदव्याख्याने "हरिभद्रः श्रीवृद्धगच्छे चतुर्दशशतग्रन्थग्रन्थनतत्परः" इति व्याहार्षीत्।

(१०) मणिभद्रः षड्दर्शनसमुच्चयलघुटीकायाम्,— "इह हि श्रीजिनशासनप्रभावनाविर्भावकप्रमोदयभूरियशश्चतुर्दशशतप्रकरणकरणोपकृतजिनधर्मो भगवान् हरिभद्रसूरिः"।

(११) जिनदत्तसूरयो गणधरसार्धशतके;—

"चउदससयपयरणगोनिरुद्धदोसो सया हयपओसो।
हरिभद्दो हरियतमो हरिव्व जाओ जुगप्पवरो[3]॥५५॥"

द्वितीयं मतं राजशेखरसूरयः प्रबन्धकोषे एभिः शब्दैर्विनिरदिक्षन्-
"१४४० ग्रन्था प्रायश्चित्तपादे (?) कृताः" इति।

तृतीयं पुनस्त्वेतेऽवूबुधन्,—

(१) श्रीरत्नशेखरसूरयः श्राद्धप्रतिक्रमणार्थदीपिकाटीकायाम्[4];—
"१४४४ प्रकरणकृत्श्रीहरिभद्रसूरयोऽप्याहुर्ललितविस्तरायाम्"

---

१ ग्रन्थस्यास्य पूर्णत्वसमयो ग्रन्थकारशब्देष्वेवायम्,—
"त्रिक सप्त-षट्काब्दे अक्षततृतीयादिने।
ग्रन्थोऽयं पूर्णतां प्राप्तः श्रीअणहिल्लपत्तने॥१॥"

२ एतस्य टीका सर्वराजगणिना व्यधायि। अग्रे ग्रन्थनामाद्यर्थं "Weber's Rep II, P 987" इति स्थलप्रदर्शनमप्यस्यामेव टीकायां लिखितान् ग्रन्थान् कक्षीकरोति, तत्रास्याष्टीकाया एवोल्लेखादिति ध्येयम्।

३ चतुर्दशशतप्रकरणगोनिरुद्धदोषः सदा हतप्रदोषः।
हरिभद्रो हततमा हरिरिव जातो युगप्रवरः॥५५॥

४ "शर गगन-मनुमिताब्दे ज्येष्ठामूलीयधवलसप्तम्याम्।
निष्पन्नमिदं शास्त्रं श्रोत्रध्येत्रोः सुखं तन्यात्॥१॥
इति तदवसानाशतो निर्माणकालोऽस्य १४०५ स्पष्ट एव।

५ एतस्य निर्मितिरवसरस्तस्मिन्नेव ग्रन्थे कर्तार एवमुपादिशन्,—
"एषा श्रीसुगुरूणां प्रसादतोऽब्दे षडङ्कविश्वमिते।
श्रीरत्नशेखरगणिर्वृत्तिमिमामकृत कृतितुष्ट्यै॥११॥"

(२) अञ्चलगच्छपट्टावल्याम्[१] "२९ श्रीहरिभद्रसूरिः १४४४ प्रकरणकर्ता"।

(३) क्षमाकल्याणमुनिः खरतरगच्छपट्टावल्याम्—"१४४४ पूजापञ्चाशकादिप्रकरणानि कृतानि" इति।

(४) श्रीविजयलक्ष्मीसूरय उपदेशप्रसादे[२] तृतीयस्तम्भे त्रयस्त्रिंशे व्याख्याने हरिभद्रसूरिचरितं व्यावर्णयन्तश्च।

अस्तु मतत्रयेऽपि यत् किञ्चिद् मतमत्र प्रमाणम्, किन्तु त्रितयमप्येतत् सूरीणां चतुर्दशग्रन्थशतप्रणयनं न व्यभिचरति, इति हरिभद्राचार्यप्रणीतग्रन्थानां तावत्यामनन्यसदृक्षायां महासंख्यायां दृढमापन्नो निर्विवादं निर्णयः। एतावतीं च विस्तरवतीं संख्यामपेक्ष्य सांप्रतमुपलभ्यानां तेषां संख्याऽतीव न्यूनतामाविभर्ति, अतिरिक्तानां (उपलभ्यमानेभ्यः) ग्रन्थानां राजापशदाविशदधर्मद्वेषजन्यात् प्रयोगात्, स्वभावोपनतविनाशस्वरूपाद् वा निमित्ताद् नामावशेषीभवनात्, नामतोऽपि वाज्ञाततताया आश्रयणात्, इति दुर्भाग्यविलसितमिदमस्माकं संभावयामः। तत्रोपलभ्यमाना इतस्तत आकर्ण्यमानाश्च त इमे;—

(१) अनुयोगद्वारसूत्रलघुवृत्तिः (२) अनेकान्तजयपताका स्वोपज्ञटीकासहिता (३) अनेकान्तप्रघट्टः (४) अनेकान्तवादप्रवेशः (५)

---

१ (See Bhandarkar's Rep. 1883-1884, Page, 320)

२ अस्या रचनासमयः विक्रमात् १८३४ संवत्सरात्मकस्तदन्तभागे कर्त्रा निर्दिष्टः। ३ अरच्ययं १८४३ वैक्रमे वर्षे इति तत्प्रशस्तौ व्यक्तम्।

[१] (See Weber's Rep. II, Page 987, I. 24) जैनग्रन्थावल्यां चास्या भाण्डागारद्वये सत्तायाः प्रतिपादक उल्लेखः। [२] मुद्रितेयं मूलरूपा सपूर्णा, टीकायुता च सा यशोविजयजैनग्रन्थमालायामंशतः। एनामनेकान्तमण्डनैकान्तखण्डनेऽप्रतीकाशां जगद्विख्यात-कलिकालसर्वज्ञश्रीहेमचन्द्राचार्योऽपि सिद्धहेमशब्दानुशासनबृहद्वृत्तौ "द्विहेतोरस्त्यणकस्य वा" (२।२।८७) इति सूत्रे "साध्वी खल्वनेकान्तजयपताकायाः कृतिराचार्यहरिभद्रस्य हरिभद्रेण वा" इति विकल्पषष्ठ्युदाहरणमुपन्यस्यमानः प्राशंसत्। एतट्टीकाया विवरणमपि द्विश्लोकसहस्रमानं मुनिचन्द्रसूरिभिर्द्वादशशताब्द्यां विनिर्मितम्। [३] धर्मबिन्दुभाषानुवादपुस्तके तदनुवादकेन निर्दिष्टोऽयं ग्रन्थः [४] स्याद्वादनिरूपणप्रवणोऽयं ग्रन्थोऽनेकान्तजयपताकासंक्षेपरूपः। षड्दर्शनसमुच्चयटीकायां चतुर्थाधिकारप्रान्तभागे जैनन्यायग्रन्थनामनिर्देशेऽस्यापि स्मरन्ति श्रीगुणरत्नसूरयः। [५] एष ग्रन्थः जिने-

हरिभद्रसूरिचरित्रम् । २१

ष्टकानि (६) आवश्यकनिर्युक्तेर्लघीयसी अथ च द्वात्रिंशतिश्लोकसहस्रप्रमाणा । टीका (७) तस्या एव चतुरशीतिश्लोकसहस्रमाना

श्रीसूरिभि १०८० वैक्रमे वत्सरे टीकया विभूषित , तथा च तस्या एव प्रशस्तौ तत्कर्ता–

"पादाम्भोजद्विरेफेण श्रीजिनेश्वरसूरिणा ।
अष्टकाना कृता वृत्ति सत्त्वानुग्रहहेतवे ॥ ३ ॥
समानामधिकेऽशीत्या सहस्रे विक्रमाद् गते ।
श्रीजाबालिपुरे रम्ये वृत्तिरेषा समापिता ॥ ४ ॥"

[६] प्रसिद्धा । यत्तु धर्मबिन्दुभाषानुवादे सूरिजीवनवृत्तान्ते तदनुवादकेन विदुषा मणिलालेन "पोते लखेली श्रीआवश्यकनिर्युक्तिनी बावीश हजार श्लोकनी टीकामा, आ प्रसगने याद करीने "चक्कीदुग" ए श्लोक (?) उपर सविस्तर वर्णन कर्यु छे, जे आनद अने बोध साथे वाचवा योग्य छे" इति "स्वय (सूरिणा) कृताया श्रीआवश्यकनिर्युक्तेर्द्वाविंशतिश्लोकसहस्रमानाया टीकाया प्रसङ्गमेत स्मृत्वा "चक्कीदुग" इति श्लोकस्य (?) विस्तरेण वर्णनमकारि, यदानन्देन बोधेन च सार्धं योग्य पठितुम्" इत्यर्थकमुक्तम्, तत् किं निबन्धनमाश्रित्य ? इति नावगच्छाम , अस्माकीने तट्टीकापुस्तके तस्या गाथायाष्टीकाया तद्वृत्तगन्धस्याप्यनुपलम्भात् । [७] एतत्सद्भावसाधकानि चात्र प्रमाणानि–

(१) वैक्रमे १६८१ तमे वर्षे समयसुन्दरोपाध्यायविरचित सामाचारीशतकम् । (See Indian Antiquary Vol, XXIII, Page 174)

(२) अञ्चलगच्छपट्टावली, यस्या "आवश्यकबृहद्वृत्ति ८४००० सहस्रकर्त्री, २२ सहस्री च" इत्युल्लेख ।

(३) मलधारिहेमचन्द्रसूरिभि प्रणीत लघीयस्यास्तन्निर्युक्तिटीकाया टिप्पनकम् ।

(४) स्वय ग्रन्थकर्तैव लघुटीकाया आदौ निज बृहट्टीकाकर्तृत्व स्मरयति, तथा च तस्या आदिभाग —

"यद्यपि मया तथान्ये कृतास्य विवृति , तथापि सक्षेपात् ।
तद्रुचिसत्त्वानुग्रहहेतो क्रियते प्रयासोऽयम् ॥ २ ॥"

अनुपलभ्योऽपि नास्या महाटीकाया इदानीन्तन , विशेषावश्यकभाष्यटीकाकर्त्रा मलधारिहेमचन्द्रसूरिणा स्वीये तल्लघुटीकाटिप्पनके स्वसमयेऽपि [illegible]

वृहट्टीका (८) उपदेशपदानि (९) कथाकोशः (१०) कर्मस्तववृत्तिः (११) कुलकानि (१२) क्षमावल्लीबीजम् (१३) क्षेत्रसमासवृत्तिः (१४)

---

[८] एतस्य सहस्रगाथाग्रन्थनिबद्धस्य नामत एवावसेयविषयस्य ग्रन्थस्य मुनिचन्द्रसूरिभिर्विहिता टीकेदानीमुपलभ्यते, 'अन्यैरपि तत्पूर्वतनैस्तस्य टीकाऽकारि' इत्यपि तट्टीकादिभागोपन्यस्तेनानेन श्लोकेनानुमीयते-

"पूर्वैर्यद्यपि कल्पितेह गहना वृत्तिः समस्त्यल्पधी-
लोकः कालबलेन तां स्फुटतया बोद्धुं यतो न क्षमः ।
तत्तस्योपकृतिं विधातुमनघास्तस्यापि तत्त्वानुगां
प्रीतिं संजनितुं सुबोधवचनो यत्नोऽयमास्थीयते ॥"

अन्त्यगाथाटीकायां च संक्षिप्तं प्रस्तुतसूरिचरितसंवादमपि समुपलभामहे; स चायम्,—"केन ? इत्याह, हरिभद्राचार्येण, यः किल श्रीचित्रकूटाचलचूलानिवासी प्रथमपर्याय एव स्फुटपठिताष्टव्याकरणः सर्वदर्शनानुयायितर्ककर्कशमतिमतामग्रगण्यः प्रतिज्ञातपरपठितग्रन्थानवबोधतच्छिष्यभाव आवश्यकनिर्युक्तिपरावर्तनाप्रवृत्तयाकिनीमहत्तराश्रयसमीपलब्ध— "चक्कीदुगं हरिपणगं" इत्यादिगाथासूत्रो निजनिपुणोहापोहयोगोऽपि कथमपि स्वयमनुपलब्धतदर्थस्तदवगमाय महत्तरोपदेशात् श्रीजिनभद्राचार्यपादमूलमवसर्पन्नन्तरा जिनबिम्बावलोकनसमुत्पन्नानुत्पन्नपूर्वबहलप्रमोदवशात् समुच्चारित-"वपुरेव तवाचष्टे-"इत्यादिश्लोकः सूरिसमीपोपगतावदातप्रव्रज्यो ज्यायसीं स्वसमय-परसमयकुशलतामवाप्य महत् प्रवचनवात्सल्यमवलम्बमानश्चतुर्दश प्रकरणशतानि चकार" इति । एतद्विधानकालश्च टीकाकृच्छब्दैरेव पूर्वमत्र विनिवेदितः [९] सर्वराजगणिना गणधरसार्धशतकटीकायामुपदर्शितः (See Weber's Rep. II, 987) [१०] धर्मबिन्दुगूर्जरभाषानुवादकानिर्दिष्टनामा । (११) पत्तनभाण्डागाराविशेषस्य हस्तलिखितसूच्याम् (Bhand. Rep. 1883|84 P. 172.) (१२) एतच्च राजशेखरसूरिप्रबन्धकोशे हरिभद्रसूरिप्रबन्धे "समरादित्यचरित्रं नव्यं शास्त्रं क्षमावल्लीबीजं कृतम्" इत्युल्लेखे 'क्षमावल्लीबीजम्' इति समरादित्यचरित्रस्य क्रोधदारुणोदर्कव्यावर्णनेन क्षान्तिवल्लरीबीजकल्पतया रूपकगर्भं विशेषणमनवबुध्यमानेन धर्मबिन्द्वनुवादकेन पृथग्ग्रन्थरूपेण तत्र परिगणितमिति संभावयामः । (१३) Kielhorn Rep. P. 78, N. 397, Weber's Rep, II, P.987 (१४) (See Jain onomasticon by Dr. Klatt, Page 6) (१५) स एवायं ग्रन्थः, यं दृष्ट्वा बौद्धमतमादृतपूर्वी सिद्धर्षिराहर्तः समजनि, यदाह स एव निजोपमितिभवप्रपञ्चाकथायाः प्रान्ते;-

चैत्यवन्दनाभाष्यं संस्कृतम् (१५) चैत्यवन्दनावृत्तिः (ललितविस्तराख्या) (१६) जम्बूद्वीपप्रज्ञप्तिटीका (१७) जम्बूद्वीपसंग्रहणी (१८) जीवाभिगमलघुवृत्तिः (१९) ज्ञानपञ्चकविवरणम् (२०) ज्ञानादित्यप्रकर-

"आचार्यो हरिभद्रो मे धर्मबोधकरो गुरुः ।
प्रस्तावे भावतो हन्त स एवाद्ये निवेदितः ॥
विषं विनिर्धूय कुवासनामयं व्यरीरचद् यः कृपया मदाशये ।
अचिन्त्यवीर्येण सुवासनासुधां नतोऽस्मि तस्मै हरिभद्रसूरये ।
अनागतं परिज्ञाय चैत्यवन्दनसंश्रया ।
मदर्थेन कृता येन वृत्तिर्ललितविस्तरा ॥

श्रीशास्त्रवार्तासमुच्चयटीकायां श्रीयशोविजयोपाध्याया अपि "तदुक्तं ललितविस्तरायां ग्रन्थकृतैव" (पृ० ६-२) "भणितं च ग्रन्थकृता ललितविस्तरायाम्" (पृ० ३३-१) इत्यादिनैतस्या अस्मार्षुः । अस्याश्च टिप्पनकमपि मुनिचन्द्रसूरिभिर्विहितम् । एतदतिरिक्तापि चैत्यवन्दनवृत्तिर्ग्रन्थावली-धर्मबिन्दुगूर्जरानुवादयोरेतत्कर्तृका प्रतिपादिता । (१६) धर्मबिन्द्वनुवादकेन ग्रन्थस्यास्य प्रकृतसूरिविहिततयोल्लेखः किं प्रमाणमुपलभ्य कृत इति न ज्ञातुं शक्यते, तत्र प्रमाणानुपदर्शनात् । (१७) यतोऽत्र तस्यैव गाथा (In the Peterson's third Rep P 284)

"छट्टाइं गाहाए दसहिं दारेहिं जंबूदीवस्स ।
संगयणी सम्मत्ता रइया हरिभद्दसूरीहिं ॥ २८ ॥"

अन्यत्र पुनः (In Peterson's First Rep Page 89)

"इय संघयणी एसा जंबुद्दीवम्मि दसपयत्थाण ।
उद्धरियमयरईए रइया हरिभद्दसूरीहिं ॥ २८ ॥

इत्यर्थत एकापि शब्दतो भिन्नोपलभ्यते, अङ्कमादृश्यं च द्वयोरपि, इत्येकः एकः कर्ता भिन्नो वा ? विरहशब्दविरहाच्च प्रस्तुतादन्य एव हरिभद्रसूरिर्वा ? इत्यथापि संशयास्पदमेतत् । एतस्याष्टीका श्रीप्रभानन्दसूरिभिः १३९० तमे विक्रमाब्दे प्राणायि, यदाहुस्ते एव तस्याम्,-

"चित्रे श्रीरुद्रपल्लीयगच्छे श्रमणपरिवृढः श्रीप्रभानन्दसूरिः
क्षेत्रादेः संग्रहिण्या अकृत समयगः सनदर्न्तां सदर्थे ।
एतां वृत्तिं खनन्दज्वलननिधुमिते विक्रमाब्दे चतुर्थ्यां
भाद्रस्य श्यामलायामिह यदनुचितं तद् बुधाः शोधयन्तु ॥२॥"

(१८) (See Dr Weber's Rep II, P. 987) जैनग्रन्थावल्यां च । (१९) विक्रमात् १६८६ वर्षे समयसुन्दरप्रणीतायां गाथासहस्र्याम् " इति ज्ञानपञ्चकविवरणप्रकरणं श्रीहरिभद्रसूरिकृतम् " इत्येवमेतत्ज्ञापकान्यक्षराणि (२०) प्राकृतगाथानिबद्धस्यास्य "नाणायत्तक"

गम् (२१) तत्त्वतरङ्गिणी (२२) तत्त्वार्थलघुवृत्तिः (२३) दर्शनशुद्धिप्रकरणम् (२४) दर्शनसप्ततिका (२५) दशवैकालिकावचूरी (२६) दशवैकालिकबृहद्वृत्तिः (२७) देवेन्द्रनरकेन्द्रप्रकरणम् (२८) द्विजवदनचपेटा (२९) धर्मबिन्दुः (३०) धर्मलाभसिद्धिः (३१) धर्म-

---

इति नाम राजशेखरसूरेः प्रबन्धकोशे, "नाणाइत्त" इति चापरत्र (Peterson's I Rep. Page 48) विलोक्यते, यस्यादिमयमार्या—

"नमिऊण जिणं जगजीवबंधवं धम्मकरणकरवट्टम् (? ट्टं) ।
वोच्छं धम्मगइ (? ई) णं धम्मविसेसं समासेणं ॥ १ ॥"

इदमेव केचित् 'नानाचित्रक' शब्देन (Weber's Rep. II, P. 987, I. 18, Klatt's Jain onomasticon P. 7) 'ज्ञानचित्रिका' नाम्ना चापरे (Peterson's Forth Rep. index P. 134) जैनधर्मप्राचीनेतिहासकारकादयः प्रतिपन्नाः । (२१) खरतरगच्छीयैः कैश्चिदेतस्या हरिभद्रकृतत्वमाम्नायते, एतच्च धर्मसागरोपाध्यायः प्रवचनपरीक्षायां प्रत्यपेत्सुः (See Bhanda. Rep. 1883|84 P. 152) (२२) संदिग्धप्रकृतहरिभद्रसूरिकर्तृकतया जैनग्रन्थावल्यादौ निर्दिष्टा । (२३) See Weber's Rep. II, P. 843 (२४) Weber's Rep. II, P. 987 ।एतस्या एवापरनामत्वेन प्रतिभासमानायाः सम्यक्त्वसप्ततिकायाष्टीका संघतिलकसूरिणा विरचिता । तेन च तट्टीकायामादौ " प्रकटीकृतामृतायमानसदुपदेशसारः कश्चित् पूर्वाचार्यः···· सम्यक्त्वसप्ततिकाभिधानशास्त्रारम्भे···· प्रथमगाथामाह" इति प्रस्तुवता न निर्दिष्टं कर्तृविशेषनाम, सामान्येनैव चोपदिष्टं तत्, इति बलवत्प्रमाणमपेक्षतेऽत्र तयोर्ग्रन्थयोरैक्यम्, तत्कर्तृत्वविनिश्चयश्च । (२५) इमामेव लघुवृत्तिनाम्ना परिभाषन्ते, प्रसिद्धा मुद्रिता चेयम् । (२६) विख्याता प्रकटिता च (२७) एतदपि प्राकृतगाथानिबद्धं मुनिचन्द्रसूरिभिष्टीकया विभूषितम् (Deccan College Catalogue, P. 209, N. 178) (२८) अस्या एव " वेदाङ्कुश " इति द्वितीयं नाम प्रतीयते (See Bhau Daji mem. P. 143) (२९) अस्य सूत्रपद्धतिमलङ्कुर्वतो ग्रन्थस्य मुनिचन्द्रसूरिभिष्टीकापि प्राणायि । सटीकोऽप्ययं प्रसिद्धो मुद्रितश्च ।-(३०) Weber's Rep. II, P. 987, I. 20-1. (३१) अन्ययोगव्यवच्छेदद्वात्रिंशिकायाः स्याद्वादमञ्जरीटीकायां मल्लिषेणसूरयः पञ्चमश्लोकव्याख्याने "तथा च धर्मसंग्रहण्यां श्रीहरिभद्राचार्यपादाः" इति स्मरन्त्येताम् । एतस्या दशश्लोकसहस्रप्रमिता टीका मलयगिरिसूरिभिर्विहिता । टीकाकृतां कालश्च स्वयमेव तैः स्वव्याकरणे मलयगिरिव्याकरणनाम्ना विश्रुते "अरुणदरातीन्

सग्रहणी (३२) धर्मसारमूलटीका (३३) धूर्ताख्यानम् (३४) नन्द्यध्ययन-वृत्ति (३५) न्यायप्रवेशसूत्रवृत्ति. (३६) न्यायविनिश्चय' (३७) न्याया-

---

कुमारपाल" इति दस्यार्थत्यादिविभक्त्यन्तमुदाहरणमुपन्यस्यद्भि कुमार-पालसमानसमय आवेदित. । सटीकोऽप्यय ग्रन्थ प्रसिद्ध । (३२) 'मलयगिरिसूरि स्वस्या प्रज्ञापनाटीकायामेतस्य ग्रन्थस्योल्लेखं करोति' (See Weber's Rep II, P 572, 1 12, fr b (३३) Decc. Coll P 147, N 407 (३४) यदाह नन्द्यध्ययनबृहट्टीकाया श्रीमान् मलयगिरिराचार्य –

"मध्येसमस्तभूपीठ यशो यस्याभिवर्धते ।
तस्मै श्रीहरिभद्राय नमष्टीकाविधायिने ॥ १ ॥"

[३५] अस्य न्यायप्रवेशसूत्रनाम्नो दिङ्नागाचार्यकृतस्य बौद्धमतानुमानप्रमाणमन्तव्यप्रतिपादनपरस्य ग्रन्थस्य टीकामेव प्रकृताचार्यो विहितवान्, इति तेनैव तदादिनिबद्धेन–

"सम्यङ्न्यायस्य वक्तार प्रणिपत्य जिनेश्वरम् ।
न्यायप्रवेशकव्याख्या स्फुटार्था रचयाम्यहम् ॥ १ ॥
रचितामपि सत्प्राज्ञैर्विस्तरेण, समासत ।
असत्प्राज्ञोऽपि सक्षिप्तरुचिसत्त्वानुकम्पया ॥ २ ॥"

इति पद्यद्वितयेन विनिश्चीयते । एतेन जैनग्रन्थावली धर्मबिन्द्वादौ प्रतिपन्न मूलटीकाद्वयकर्तृत्व हरिभद्रसूरेश्चिन्त्यम्, स्वोपज्ञटीकात्वे 'सत्प्राज्ञै विस्तरेण रचितामपि' इत्युक्तस्यानुपपत्ते । प्रान्तभागश्लोकटीकातश्चापि तदनुक्तम्, तत्र हि–

"पदार्थमात्रमाख्यातमादौ दिङ्मात्रसिद्धये ।
यात्र युक्तिरयुक्तिर्वा सान्यत्र सुविचारिता ॥ १ ॥"

इत्यय मूलग्रन्थस्य श्लोक । अत्र चतुर्थपादस्थस्य 'अन्यत्र' शब्दस्य टीकां विदधता 'अन्यत्र–प्रमाणसमुच्चयादौ' इति दिङ्नागाचार्यकृतस्य प्रमाणसमुच्चयस्योल्लेखो व्यधायि, स्वकर्तृकत्वे तु मूलस्य, स्वप्रणीतग्रन्थवचनमेवात्र वक्तव्य स्यादिति । टीकायाश्चान्ते न्यस्तस्य–

"न्यायप्रवेशक यद् व्याख्यायावाप्तमिह मया कुशलम् ।
न्यायाधिगम सुकर सलभतां भव्यो जनस्तेन ॥ १ ॥"

इति श्लोकस्य विरहाङ्काङ्कितत्वाभावेऽपि तदन्ते प्रतिपादितात् "समाप्ता चेय शिष्यहिता नाम न्यायप्रवेशकटीका, कृति सिताम्बराचार्यजिनभट्ट [१८]पादसेवकस्याचार्यश्रीहरिभद्रस्य" इत्युल्लेखात् तत्कर्तृकत्वमेव नि सश-

यमवगम्यते । टीका चेयं पार्श्वदेवगणिना पञ्जिकया विभूषयांबभूव, यस्या अयमादिमो भाग इहोपयुक्तः—

"दुर्वारमारकरिकुम्भतटप्रभेद-
कण्ठीरवं जिनपतिं वरदं प्रणम्य ।
न्यायप्रवेशकमिति प्रथिते सुशास्त्रे
प्रारभ्यते तनुधियापि हि पञ्जिकेयम् ॥१॥"

........हरिभद्राख्यः सूरिर्न हि न शिष्ट इति न्यायप्रवेशकाख्यशास्त्रविवरणकरणप्रवर्तमान इष्टदेवतानमस्कारार्थं........श्लोकद्वयं चकार "सम्यगित्यादि" इति । अन्ते च पञ्जिकाकार एव—

"न्यायप्रवेशशास्त्रस्य सद्वृत्तेरिह पञ्जिका ।
स्वपरार्थं दृब्धा स्पष्टा पार्श्वदेवगणिनाम्ना ॥ १ ॥
ग्रहरसरुद्रैर्युक्ते विक्रमसंवत्सरे तु राधायाम् ।
कृष्णायां च नवम्यां फाल्गुनमासस्य निष्पन्ना ॥ २ ॥

इति वृत्तद्वयेन स्वाभिधान-विधानकालादिकमजिज्ञपत् । (३६) धर्मबिन्द्वनुवादकेन निर्दिष्टः । (३७) प्रबन्धकोषे राजशेखरसूरिर्नामग्राहमेतां निरदिक्षत् । (३८) एतन्नामानि प्रकरणान्यन्यैरपि श्रीअभयदेवसूर्यादिभिः कृतानि स्मर्यन्ते, प्रस्तुतकर्तृकृतं चाप्याम्नायते। (३९) प्रबन्धकोषे तत्कर्त्रा सूरिकर्तृकत्वेनावाचि । (४०) प्रसिद्धोऽयं ग्रन्थः, मध्याह्नव्याख्याने हर्षनन्दनगणिरपि "हरिभद्रसूरिकृतपञ्चवस्तुटीका" इत्युदलिखत् । (४१) एतस्य टीकापि मलयगिरिणा विहिता । सुप्रसिद्धोऽयं ग्रन्थः । (४२) धर्मबिन्दुगूर्जरभाषाविधायकस्तु स्वोपज्ञवृत्तियुक्तं ग्रन्थमिमं प्रस्तुतसूरिकर्तृकं वेदयति; एतच्चायुक्तमुत्पश्यामः, तट्टीकाया अन्ते "कृतं चिरन्तनाचार्यैः, विवृतं च याकिनीमहत्तरासूनुश्रीहरिभद्राचार्यैः" इति स्पष्ट तदन्याचार्यकृतमूलत्वोल्लेखासादनात् (See Peterson third report, P. 293 (४३): मध्याह्नव्याख्यानस्थेन " अन्यैः श्रीहरिभद्रसूरिप्रमुखैर्द्वादशधाऽयमुक्तः श्रीपञ्चस्थानके—

उक्कोस सट्ठि पन्ना चत्ता तीस दसट्ठ पण दसगं ।
दस-नव-ति-दु-एगद्धं च जिणुग्गह बारसविभेयं ॥"

इत्युल्लेखेन संभाव्यमानमिदम्। (४४) एतद् नवाङ्गवृत्तिकारिणाऽभयदेवसूरिणा टीकया समलमकारि । टीकाविधानस्थलसमयादि तत्कृदेव

(४४) पञ्चाशकम् (४५) परलोकसिद्धि (४६) पिण्डनिर्युक्तिवृत्ति (४७) प्रज्ञापनाप्रदेशव्याख्या (४८) प्रतिष्ठाकल्प (४९) बृहन्मिथ्यात्वमथनम् (५०) मुनिपतिचरित्रम् (५१) यतिदिनकृत्यम् (५२) यशोधरचरित्रम् (५३) योगदृष्टिसमुच्चय (५४) योगबिन्दुः (५५) योगशतकम्

"चतुरधिकविंशतियुते वर्षसहस्रे शते च सिद्धेयम् ।
धवलकपुरे वसतौ धनपत्योर्बकुलनन्दिकयो ॥
अणहिल्लपाटकनगरे सघरैर्वर्तमानबुधमुख्यै ।
श्रीद्रोणाचार्यैर्विद्भि शोधिता चेति ॥"

इति श्लोकयुग्मेन स्वयमाख्यत् । ये पुनर्दशमश्रावकविधि (Indian Antiquary, Vol XXIII, P 194) दीक्षाविधि (Peterson forth Rep P CXXXIX) चैत्यवन्दनविधि (Peterson I Rep App P 16, N 25) प्रभृतिनामभिस्तत्र तत्रावेदिता प्रस्तुतसूरिकर्तृकतया ग्रन्था, तेऽस्यैव ग्रन्थस्य विभागरूपा' समवसेया । एकोनविंशतिपञ्चाशकयात्मन्यस्मिन् ग्रन्थे श्रावकधर्मविधिपञ्चाशकाह्वयस्य प्रथमपञ्चाशकस्य चूर्णिरपि चन्द्रसूरिशिष्ये पाक्षिकसूत्रवृत्तिकर्तृभिर्यशोदेवसूरिभिर्निरमायि, यस्या स्वसमयादिनिभावकाभिर गाथानिचय तत्कर्ता व्यरीरचत्,-

"भद्दमईण हियट्ठे एसा चुन्नी समुद्धिया सुगमा ।
सिरिचंदकुलनहगणमयकसिरिचंदसूरीण ॥ २ ॥
सिरिवीरगणिमुणीसरधुरसिद्धतसिंधुसिस्साण ।
अही सिरमाणेहि सिरिमज्जसएवसूरीहि ॥ ३ ॥
नयण मुणि थाणुमाणे काले विगयम्मि विक्कमनिवाओ ।
सविपाय (?) एसा विवुहेहि समयनिउणेहि ॥ ४ ॥"

(४५) Weber's Rep II, P. 987 (४६) अपूर्णामूतेय वीराचार्यैः परिपूर्तिमनायि (See Kilhorn Rep P 27) (४७) यदाह प्रज्ञापनाटीकायां मलयगिरिसूरि',-

अयति हरिभद्रसूरिष्टीकाकृद् विवृतविषमभावार्थ ।
यद्वचनवशादहमपि जातो लेशेन वृत्तिकर ॥

(४८) Weber's Rep II, P 987 (४९) Weber's Rep II, P 987 (५०) Peterson First Report, P 128, N 314 (५१) जैनग्रन्थावल्यामुपात्तम् (५२) Weber's Rep II, P 1064 (५३) श्रेष्ठिदेवचन्द्रलालभाईजैनपुस्तकोद्धारे द्वादशाङ्करूपेण मुद्रित (५४) जैनधर्मप्रसारकसभया मुद्रित सटीक, टीकाकर्तृश्चाद्याऽद्य यावदनिर्णीता (५५)

(५६) योगविंशतिः (५७) लग्नशुद्धिः (५८) लघुक्षेत्रसमासः (५९) लघुसंग्रहणी (६०) लोकतत्त्वनिर्णयः (६१) लोकबिन्दुः (६२) विंशिका (६३) वीरस्तवः (६४) वीराङ्गदकथा (६५) वेदबाह्यतानिराकरणम् (६६) व्यवहारकल्पः (६७) शास्त्रवार्तासमुच्चयः स्वोपज्ञटीकासहितः (६८) श्रावकप्रज्ञप्तिवृत्तिः (६९) श्रावकधर्मतन्त्रम् (७०) षड्दर्शनस-

---

प्रबन्धकोषे राजशेखरसूरिरेतस्यास्मरत् (५६) धर्मबिन्दुगौर्जरानुवादकर्त्रा निर्दिष्टनाममात्रः (५७) विचारामृतसंग्रहादौ कुलमण्डनसूर्यादिभिः प्रत्यपादि। अन्यत्र (Peterson I Rep. P. 88) 'लग्नकुण्डलिका' शब्दवाच्य एतत्कर्तृको ग्रन्थो दृश्यते, यस्येयमादिमाऽऽर्या—

"अवितहसव्वाएसं नमिउं चउवीसमं जिणवरेसुम् (? सं)।
वुच्छामि समासेणं लग्गं गुरूवएसेणम् (? णं) ॥ १ ॥"

द्वयोश्चैतयोर्लग्नशुद्धि-लग्नकुण्डलिकाभिधयोः पार्थक्यमैक्यं वाऽर्थतः? इति विशिष्टप्रमाणोपलम्भोपलभ्यम्। (५८) क्षेत्रसमासवृत्तेरतिरिक्तत्वेऽस्य धर्मबिन्दुभाषानुवादोल्लिखाद् नातिरिक्तं प्रमाणम्, इति स एव (अनुवादोल्लेखः) प्रमाणाऽप्रमाणतया विमर्श्यः (५९)नेयं जम्बूद्वीपसंग्रहिणीतोऽप्यतिरिक्ता (६०)तत्कर्तृकत्वेन प्रसिद्धो मुद्रितश्चायम् (६१) Weber's Rep. II, P. 987 (६२) दाक्षिणात्यराजकीयप्राचीनपुस्तकसंग्रहे (Deccan College Library) एतद्ग्रन्थावलोकनसौभाग्यं मया प्राप्तम्। प्राकृतभाषात्मकोऽयं ग्रन्थः, प्रत्येकं विंशतिं गाथाः संकलयत्सु विंशतौ प्रकरणेषु विभक्तश्च। संभावयामि, योगविंशतिनाम्नाऽस्यैव निर्देशः कृतः स्यादिति (६३) यस्यान्तभागे "थुत्तं वंदे मयणविरहं तस्स नाहंपि वीरं" इति विरहाङ्कोपलब्धिरिति तत्कर्तृकोऽयं धर्मबिन्द्वनुवादयित्रा परिगणितः (६४) ग्रन्थावल्यादौ तत्कर्तृभिः संशयितनिर्मातृप्रस्तुतहरिभद्राचार्यक उपदिष्टः (६५) Peterson Collection 1882–83. P. 126, N. 129 (६६) धर्मबिन्दुगूर्जरवागनुवादकः स्वानुवादपुस्तके निवेदयति स्मैनम् (६७) यशोविजयगणिकृतया टीकया सहितः प्रकाशितः। स्वोपज्ञटीकापि सुप्रसिद्धा (६८) समयसुन्दरगणिः सामाचारीशतके हरिभद्रसूरिकर्तृकतयेमामदर्शत्। जयसोमसूरिणा विचाररत्नसंग्रहे "सावयपन्नत्तिसूत्रवृत्तिः" इत्युल्लिखता मूलग्रन्थस्यास्य प्राकृतत्वं विभावितम्। एतेन धर्मबिन्दुश्रावकविषयांशादस्य भेदः साधितो भवति। इयं च प्रबन्धकोषे "श्रावकप्रज्ञप्तिः" इति नाम्ना प्रस्तुताचार्यनिर्मिततयाधिकृताद् ग्रन्थाद् भिन्ना नवा? इति पर्यालोचनं न विशिष्टापरप्रमाणमन्तरेण निर्णयमाविशति (६९) एतस्य मानदेवसूरिकृतवृत्त्याऽन्वितस्योल्लेखः (See Decc. Coll.

मुच्चय. (७१) षड्दर्शनी (७२) षोडशकम् (७३) सक्तितपर्चासी (७४) सग्रहणीवृत्ति. (७५) सपञ्चासित्तरी । (७६) संबोधसित्तरी । (७७) सबोधप्रकरणम् । (७८) ससारदावास्तुति· (७९) सस्कृतात्मानुशा-

Catalogue, P 209, N 178) (७०) गुणरत्नसूरिणा, मणिभद्रेण च निर्दुपा क्रमशो बृहत्या लघ्व्या च टीकयाऽय विभूषित । द्वाभ्यामपि पृथक् पृथग् मुद्रित । गुणरत्नसूरिसमय प्रागेवात्र निदर्शित, मणिभद्रस्य तु स विनिर्णेतव्यकोटिमुपढौक्यते (७१) प्रमाणमन्तरेण धर्मविद्वनुवादकदर्शितेय 'भीमो भीमसेन' इति न्यायमननुरुन्धत षड्दर्शनसमुच्चयाद् भिद्येत इति नानुमन्तु शक्नुम (७२) श्रेष्ठिदेवचन्द्रलालभाई-जैनपुस्तकोद्धारे मुद्रित एव ग्रन्थ । अमुष्य श्रीयशोभद्रसूरिणा, श्रीमद्यशोविजयोपाध्यायेन च टीके अपि व्यधायिषाताम् ।

(७३-७५-७६) Bhau Daji, Mem P 25, 24 and 42-43. (७४) Weber's Rep II, 987 (७७) राजनगरे मुद्रितम् । (७८) प्रसिद्धा, भूय प्रतिक्रमणसूत्रे मुद्रिता च । गाथाचतुष्टयरूपेय 'कर्त्रा पर्यवसानसमये विहिता' इत्याम्नाय । (७९) Weber's Rep II, 987 (८०) तदेवेदम्, यत्र निजकोपप्रशमनाय गुरुभि (जिनभटसूरिभि·) प्रेषितासु पूर्वमत्रैव दर्शितरूपासु "गुणसेण अग्गिजम्मा" इत्यादिषु चतसृषु गाथासु प्रथमगाथात्रयेण बीजायितम्, सवदति चैतत् प्रभावकचरित्रमपि—

"मनसि गुरुविरोधवर्धिगाथात्रितयमिद गुरुभिर्गुरुप्रसादात् ।
प्रहितमभिसमीक्ष्य सैष पूर्वं स च समरार्कचरित्रमाततान ॥"

एतच्चरित्र कविचक्रचूडामणिर्धनपालस्तिलकमञ्जर्यामेवमभिष्टौति—

"निरोद्धु तीर्यते केन समरादित्यजन्मन ।
प्रशमस्य वशीभूत समरादित्यजन्मन ॥ २९ ॥"

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यगुरव श्रीदेवचन्द्रसूरयोऽपि निजे शान्तिनाथचरिते प्राहु —

"वंदे सिरिहरिभद्द सूरिं विउसयणणिग्गयपयाव ।
जेण य कहापवधो समराइच्चो विणिम्मविओ ॥"

इदमेवाश्रित्य प्रद्युम्नसूरिभिर्विक्रमाद् १३२४ तमे सवत्सरे "समरादित्यसक्षेप" सस्कृतभाषया श्लोकबद्धो निबद्ध, यत् त एव तत्र प्रतिसर्गमचकथन् पद्यमेकमुपनिबध्नन्त· । एतस्य सुमतिवर्धनगणिभिष्टिप्पनकमप्यकारि (Peterson Fifth Rep P 305) (८१) जैनग्रन्थावल्यादौ निरदेशि । अनेकान्तजयपताकाटीकायामेतदनुपातीनीमान्यक्षराणि—"विशेषतस्तु सर्वज्ञसिद्धिटीकातोऽवसेय" इति (यशोविजयजैनग्रन्थमालामुद्रि-

सनम् (८०) समराइच्चकहा (८१) सर्वज्ञसिद्धिप्रकरणं सटीकम् (८२) स्याद्वादकुचोद्यपरिहारः।

एतावद्ग्रन्थनिर्माणातिरिक्तं महानिशीथसूत्रोद्धारमपि हरिभद्रसूरिर्विनिरमास्त, यदुक्तं प्रभावकचरित्रे;—

"चिरविलिखितवर्णविशीर्णभग्नप्रविवरपत्रसमूहपुस्तकस्थम्।
कुशलमतिरिहोद्दधार जैनोपनिपदिकं स महानिशीथसूत्रम् ॥२१६॥"

यद्यपि जिनप्रभसूरयस्तीर्थकल्पे महानिशीथोद्धारविधातारं जिनभद्रगणिक्षमाश्रमणमाचक्षते, तथापि न तेनात्र विसंवादः, जिनभद्रगणिक्षमाश्रमण-हरिभद्रसूर्योः समानकालिकतया द्वयोरपि संभूय तत्करणसंभवेन मातुष्पुत्रादिन्यायेनोभयोरपि तदुद्धारकत्वव्यपदेशस्योपपद्यमानत्वात्।

अयं च श्रीहरिभद्रसूरिः प्रायः समस्तानामपि स्वग्रन्थानामन्तभागं विरहशब्देनाङ्कत्; यदाहुरष्टकवृत्तौ विरहशब्दं विवृण्वन्तः श्रीजिनेश्वरसूरयः—

"विरहशब्देन हरिभद्राचार्यकृतत्वं प्रकरणस्यावेदितम्, विरहाङ्कत्वाद् हरिभद्रसूरे(रिकृते)रिति।"

पञ्चाशकवृत्तौ श्रीमदभयदेवसूरयोऽपि—

"इह च विरहशब्देन श्रीहरिभद्राचार्यकृतता प्रकरणस्य सूचिता, विरहाङ्कत्वात् तस्य" इति।

ललितविस्तरापञ्जिकायां मुनिचन्द्रसूरयश्च—

"इह विरह इति याकिनीमहत्तरासूनोराचार्यहरिभद्रस्य"

योगविन्दुटीकायां चाविनिर्णीतनामधेयास्तत्कर्तारश्च—

"विरह इति च भगवतः श्रीहरिभद्रसूरे प्रकरणाङ्कद्योतकः" इति।

प्रबन्धकोषे राजशेखरसूरयश्च—

"तत् प्रथमं याकिनीधर्मसूनुरिति हरिभद्रग्रन्थेष्वन्तेऽभूत्; १४४० पुनर्भवविरहः" इति।

समुपलभामहेऽपि दृढं तत्कर्तृकतया निश्चितेष्विदानीमप्यवाप्येषु ग्रन्थेषु प्रान्तभागे विरहशब्दम्। कानिचिदेतादृशि स्थलानि निदर्शनतयोपदर्शयितुमिह युक्तानि;—

तायां पृ० १००) (८२) अनेकान्तजयपताकायाः "लेशतो निदर्शितमेव, प्रपञ्चतस्त्वन्यत्र वृत्त्ययोग-संख्यादिव्यभिचार-तद्भूतप्रत्ययप्रसङ्गादिना युक्तिकलापेन निराकृतमिति नेह प्रयासः" इत्यत्रस्थस्य 'अन्यत्र' पदस्य टीकायां "अन्यत्र स्याद्वादकुचोद्यपरिहारादौ" इत्युपलब्धेः (पृ० २९८, २७७)।

१ न्यायप्रवेश-समरादित्यचरित्रादौ तददर्शनादव्याप्तिपरिहारः प्रायःकलम्।

"अष्टकाख्य प्रकरण कृत्वा यत् पुण्यमर्जितम् ।
विरहात् तेन पापस्य भवन्तु सुखिनो जना. ॥"

इत्यष्टकेषु,

"स तत्र दु.खविरहादत्यन्तसुखसंगत ।
तिष्ठत्ययोगो योगीन्द्रवन्द्यस्त्रिजगदीश्वरः ॥ ३ ॥"

इति धर्मबिन्दौ,

"कृत्वा यदर्जितं पुण्यं मयैनां शुभभावत. ।
तेनास्तु सर्वसत्त्वाना मात्सर्यविरहः परः ॥"

इति ललितविस्तरायाम्;—

"कृत्वा प्रकरणमेतद् यदवाप्तं किञ्चिदिह मया कुशलम् ।
भवविरहबीजमनघ लभता भव्यो जनस्तेन ॥"

इति शास्त्रवार्तासमुच्चये,

"योग्येभ्यस्तु प्रयत्नेन देयोऽय विधिनान्वितै ।
मात्सर्यविरहेणोच्चै श्रेयोविघ्नप्रशान्तये ॥ २२६ ॥

इति योगदृष्टिसमुच्चये,

"एते प्रवचनत. खलु समुद्धृता मन्दमतिहितार्थं तु ।
आत्मानुस्मरणाय च भावा भवविरहसिद्धिफला. ॥ १६ ॥"

इति षोडशकप्रकरणे,

"कृत्वा प्रकरणमेतद् यदवाप्तं कुशलमिह मया तेन ।
मात्सर्यदु खविरहाद् गुणानुरागी भवतु लोक ॥ १० ॥"

इत्यनेकान्तजयपताकायाम्;

"समुद्धृत्यार्जित पुण्यं यदेन शुभभावतं ।
भवान्ध्यविरहात् तेन जन. स्ताद् योगलोचन. ॥५२६॥"

इति योगबिन्दौ,

"वाणीसन्दोहदेहे भवविरहवरं देहि मे देवि ! सारम्"

इति संसारदावास्तुतौ;

"काऊण पगरणमिण पत्त जं कुसलमिह मया तेण ।
दुक्खविरहाओ भव्वा लभतु जिणधम्मसबोधि ॥"

इति धर्मसंग्रहण्याम्;

"जाइणिमयहरियाए रइता एते उ धम्मपुत्तेण ।
हरिभद्दायरिएण भवविरह इच्छमाणेण ॥"

---

१ कृत्वा प्रकरणमिद प्राप्त यत् कुशलमिह मया तेन ।
दु खविरहाद् भव्या लभन्ता जिनधर्मसंबोधिम् ॥

२ याकिनीमहत्तराया रचितान्येतानि तु धर्मपुत्रेण ।
हरिभद्राचार्येण भवविरहमिच्छता ॥

इत्युपदेशपदेषु;

"जम्हा एसो सुद्धो अणियाणो होइ भावियमईणं ।
तम्हा करेह सम्मं जह विरहो होइ कम्माणं ॥ ५४ ॥"

इति पञ्चाशकग्रन्थे च ।

विरहाङ्ककरणकारणं च स्वभागिनेयविद्वच्छिष्यहंस-परमहंसविरहसूचनमिति; यत् प्रभावकचरित्रे—

"अतिशयहृदयाभिरामशिष्यद्वयविरहोर्मिभरेण तप्तदेहः ।
निजकृतिमिह संव्यधात् समस्तां विरहपदेन युतां सतां स मुख्यः२०६"

ग्रन्थग्रन्थनानन्तरं, तत्प्रचारमन्तरेण तत्प्रयाससाफल्याभावमाकलय्य तदर्थमाहितस्वान्तचिन्तः सूरिर्द्रिरिद्रमपि शुभशकुनादिना निजकार्यपरिपूर्त्यलम्भविष्णुमेकं कञ्चन कार्पासिकवणिजमवेक्ष्य विमलोपदेशेन विहिताहर्तं तं निमित्तविद्याबलेन प्रचुरद्रव्यशालिनमारचत् । स च कृतज्ञतामुररीकुर्वन् सूरिविहितग्रन्थसार्थमेकैकशोऽनेकादर्शं भूम्ना द्युम्नव्ययेनालीलिखत्, तदातनयतिपतिभ्योऽढुढौकत्, आसुसूत्रच्चेत्थं सर्वत्राप्रतिबद्धप्रचारं तम् ।

अस्याचार्यवर्यस्य हरिभद्रस्य कथितचरितमेव निरुपमगुणगणमाणिक्यरोहणतां प्रसाधयति, विशालसंख्याका विविधविषयव्यावर्णनपरा इयन्तो ग्रन्था एव च परममवधिमधिगतां विशदविशारदताश्रियं परिचाययन्ति, इति विशेषतः स्वतः किञ्चिदप्यनुच्चार्य प्राचामेव प्राज्ञानामिदंसंबन्धिनः काँश्चिदुद्गारानिहोद्धर्तुमुपयुक्तमवधारयामि; तथाहि—

"सूर्यप्रकाश्यं क नु मण्डलं दिवः खद्योतकः क्वास्य विभासनोद्यमी ।
क धीशगम्यं हरिभद्रसद्वचः काधीरहं तस्य विभासनोद्यत- ? ॥ ३ ॥"
(अष्टकटीकायां श्रीजिनेश्वरसूरयः)

"परहिताधाननिबिडनिबद्धबुद्धिर्भगवान् सुगृहीतनामधेयः श्रीहरिभद्रसूरिः"
(उपदेशपदवृत्तौ मुनिचन्द्रसूरयः)

"श्रीसिद्धसेन-हरिभद्रमुखाः प्रसिद्धा-
स्ते सूरयो मयि भवन्तु कृतप्रसादाः ।

---

१ यस्मादेष शुद्धोऽनिदानो भवति भावितमतीनाम् ।
तस्मात् कुरुथ सम्यग् यथा विरहो भवति कर्मणाम् ॥

२ एकोनविंशतावपि पञ्चाशकेषु प्रत्येकमन्त्यगाथायां विरहशब्दः समुपलभ्यते । अत एव तानि कतिपयानि भिन्नभिन्नग्रन्थरूपेण तत्र तत्रोल्लिखितान्यन्यैरिति संभाव्यते ।

येषा विमृश्य सतत विविधान् निबन्धान्
शास्त्र चिकीर्षति तनुप्रतिभोऽपि मादृक् ॥ ८ ॥"
(स्याद्वादरत्नाकरे वादिश्रीदेवसूरय.)

"हारिभद्र वच क्वेदमतिगम्भीरपेशलम् ।
क चाह जडधीरेप स्वल्पशास्त्रकृतश्रम ॥ ९ ॥"
(धर्मसग्रहणीटीकाया श्रीमन्मलयगिरिसूरय)

"नित्य श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुत-
ज्ञानश्रीसमलङ्कृता सुविशदाचारप्रभाभासुरा ।
येषा वाक्प्रपया प्रसन्नतरया शीलाम्बुसंपूर्णया
भव्यस्येह न कस्य कस्य विदधे चेतोमलक्षालनम् ॥१॥"
(जम्बूद्वीपसंग्रहणीटीकाया श्रीप्रभानन्दसूरय)

"मतिर्बौद्धा ! शुद्धा प्रभवति कथ सात्र भवता
विचारश्चार्वाका ! प्रचरति कथ चारुचतुर ? ।
कुतर्कैस्तर्कज्ञा किमपि स कथ तर्कयति च
सति स्याद्वादाङ्के प्रकटहरिभद्रोक्तवचने ? ॥ १ ॥
ग्रावग्रन्थिप्रमाथिप्रकटपटुरणत्कारवाग्भारतुष्ट-
प्रेङ्खद्विर्पिष्ठदुष्टप्रमदवशभुजास्फालनोत्तालवाला ।
यद् दृष्ट्वा मुकयन्त स्वयमतनुमद वादिनो हारिभद्रं
तद् गम्भीरप्रसन्न न हरति हृदय भावित कस्य जन्तो ? ॥२॥
यथास्थितार्हन्मतवस्तुवेदिने निराकृताशेषविपक्षवादिने ।
विदग्धमध्यस्थनृमूढतारये नमोऽस्तु तस्मै हरिभद्रसूरये' ॥ ३ ॥'

१ अध्ययनाय सगमसिंहसूरिसमीप नागपुरे ('नागोर' इतीदानीं प्रसिद्धे) आगतो जयसिंहसूरिशिष्यो यक्षदेवनामा कश्चिद् विपश्चिद् हरिभद्रसूरेरनेकान्तजयपताकादिन्यायग्रन्थान् विलोक्य विस्मयावहहृदयो निजं कवित्वकौशलमप्रतिनिघ्नन् श्लोकत्रयीमिमां चकार' इति तेनैव तत्परतो निबद्धा श्लोकद्वयी निवेदयति, सा चेयम्,—

"सितपटहरिभद्र ग्रन्थसदर्भदर्भं
विदितमभयदेव निष्कलङ्काकलङ्कम् ।
सुगतमतमथालङ्कारपर्यन्तमुच्चै-
स्त्रिविधमपि च तर्क वेत्ति य साऽत्र भट्टो ॥४॥
श्रीमत्सगमसिंहसूरिसुकवेस्तस्याङ्घ्रिसेवापर
शिष्य श्रीजयसिंहसूरिविदुषस्त्रैलोक्यचूडामणे ।
य श्रीनागपुरे (?) प्रसिद्धसुपुरस्थायी श्रुतायागत
श्लोकान् पञ्च चकार सारजडिमाऽसौ यक्षदेवो मुनि ॥५॥

"श्रीहरिभद्रसूरीन्द्रः पारीन्द्र इव विश्रुतः ।
परतीर्थ्यांस्त्रासयित्वा मृगानिव गुर्जयी[1] ॥ १ ॥"
"हारिभद्रं वचः क्वेदं बहुतर्कपचेलिमम् ।
क्व चाहं शास्त्रलेशज्ञस्ताद्दक्तन्त्रविशारदः ॥ २ ॥
"येषां गिरं समुपजीव्य सुसिद्धविद्या-
मस्मिन् सुखेन गहनेऽपि पथि प्रवृत्तः ।
ते सूरयो मयि भवन्तु कृतप्रसादाः
श्रीसिद्धसेन-हरिभद्रमुखाः सुखाय ॥ ३ ॥"
(शास्त्रवार्तासमुच्चयवृत्तौ श्रीयशोविजयोपाध्यायाः पृ० १, पृ० ३९९)
"सिरिपायलित्तकइ-बप्पभट्टि-हरिभद्दसूरिपमुहाणं ।
किं भणिमो उण्णवि न गुणेहिं समो जए सुकई[2] ॥"
(भुवनसुन्दरीकथायां श्रीविजयसिंहसूरयः)
"हयकुसमयभडजिनभडसीसो सेसुव्व धरियतित्थधरो ।
जुगपवरजिणदत्तपहुत्तसुत्ततत्तत्थरयणसिरो ॥५८॥
तं संकोइयकुसमयकोसिअकुलममलसुत्तमं वंदे ।
पणयजणदिन्नभद्दं हरिभद्दपहुं पहासंतं[3] ॥५९॥
[गणधरसार्धशतके श्रीजिनदत्तसूरयः]
"भद्दं सिरिहरिभद्दस्स सूरिणो जस्स भुवणरंगम्मि ।
वाणी विसट्टरसभावमंथरा नच्चए सुइरं[4] ॥१०॥"
[सुपासनाहचरिए श्रीलक्ष्मणगणयः]

ईदृशस्य शासनधुराधुरीणतामादधानस्य सूरिपुङ्गवस्य विदितेऽप्येतावति प्रायः प्राप्तव्यसमस्ते चरितसंबन्धिनि व्यतिकरे, सत्तासमयविज्ञानविरहिणि, न जिज्ञासा विरतिमाप्नोति पुरावृत्तप्रियाणामिदन्तनानां जनानाम्, अतस्तमप्यत्र मनाग् मीमांसनीयतया प्रस्तूयमानं

---

१ शास्त्रविशारदजैनाचार्यश्रीमद्विजयधर्मसूरीणां ललितविस्तराहस्तादर्शे प्राचीने केनापि विदुषा विरचय्येदं काव्यमुपन्यस्तमुपालम्भि ।

२ श्रीपादलिप्तकवि-बप्पभट्टि-हरिभद्रसूरिप्रमुखाणाम् ।
किं भणामः पुनरद्यापि न गुणैः समो जगति सुकविः ॥ १ ॥

३ हतकुसमयभटजिनभटशिष्यः शेष इव धृततीर्थधरः ।
युगप्रवरजिनदत्तप्रभूक्तसूत्रतत्त्वार्थरत्नशिराः ॥५८॥
तं संकोचितकुसमयकौशिककुलममलमुत्तमं वन्दे ।
प्रणतजनदत्तभद्रं हरिभद्रप्रभुं प्रभासयन्तम् ॥५९॥

४ भद्रं श्रीहरिभद्रस्य सूरेर्यस्य भुवनरङ्गे ।
वाणी विकसितरसभावमन्थरा नृत्यति सुचिरम् ॥१०॥

न नाम नौचित्यमनतिवर्तिष्यमाणमामनामि । तत्र तद्यपि पुरा प्रस-ङ्गतष्टिप्पण्यादिनिष्टङ्कितेभ्य. प्रकृतसूरिग्रन्थ-नाम महत्त्वादि निजनिज-ग्रन्थेषुल्लिलिखिवद्भ्य प्रदर्शितसुनिश्चितसत्तासमयादिभ्यो . जिनेश्वरसूरिप्रभृतिभ्यो ग्रन्थकृद्भ्य , येषु सर्वेष्वपि

"सवत्सरशतनवके द्विषष्टिसहितेऽतिलङ्घिते चास्या. ।
ज्येष्ठे सितपञ्चम्यां पुनर्वसौ गुरुदिने समाप्तिरभूत् ॥"

इत्युपमितिभवप्रपञ्चावसाने स्वीयसत्तावसर निर्दिशन् सिद्धर्षिग-णि ' प्राचीनतम , नार्वाचीनोऽयमाचार्य इति दृढमवधारितमखिलैः कृतिभि , तथापि, सिद्धर्षिसूरे प्राचीनत्व सध्रीचीनत्व वा सूरेरस्य ?' इत्यद्यापि निर्बाधनिर्णयाधायकतादृशापरसवादविरहमामनता विवा-दास्पदमेतद् विदुषाम्। राजशेखरसूरयो हि स्वकीये प्रबन्धकोषे सिद्धर्षे-र्हरिभद्राचार्यहस्तदीक्षितशिष्यत्वमावेदयन्तस्तत्समानकालिकत्व प्रस्तु-तसूरे प्रत्यपद्यन्त, प्रत्यपादयश्च

"आचार्यो हरिभद्रो मे धर्मबोधकरो गुरु" ।
प्रस्तावे भावतो हन्त ! स एवाद्ये निवेदित ॥"

इत्युपमितिभवप्रपञ्चोक्तमेव मनसिकृत्य स्वमतमातिष्ठमानाः

"नमोऽस्तु हरिभद्राय तस्मै प्रवरसूरये ।
मदर्थ निर्मिता येन वृत्तिर्ललितविस्तरा ॥"

इति तद्यस्यमेव पद्यमपि स्वपक्षानुकूलम् । ऐदयुगीना Dr H Jacobi, Dr Leumann प्रभृतय पाश्चात्या विद्वासोऽप्येनमेव सिद्धर्षितुल्यसमय सूरिसत्तासमयममसत । प्रभाचन्द्रसूरय पुन , ये राजशेखरसूरेर्नातिपूर्वतना , निजप्रभावकचरित्रे सिद्धर्षिसूरि गर्ग-र्षिहस्तदीक्षितमाचक्षाणा सिद्धर्षिप्राक्कालवर्तित्व प्रस्तुतसूरेराचीक्लि-दन्, समार्तिथत च गर्गर्ष्युपदर्शितललितविस्तराख्यपुस्तकावलोक नत प्रबोधमनाप्तस्य सिद्धर्षिगणेस्तत्प्रणायकहरिभद्राचार्योपरततया पूर्वोक्तपद्यविनिर्माणम् ।

द्वयोरप्यनयोर्मतयो कतरत् तद् युक्तमिति पर्यालोचने, प्रथम मतमनेकबाधबाधित विभाव्यते, येषु प्रथमो बाधस्तावत् कस्यापि प्राच्यस्य विपश्चितोऽप्यार्येऽसमतिः, द्वितीय स तद्विपर्ययरूपेण भूयसां प्राचामनुमति , तृतीयश्च राजशेखरसूरेर्निम्नदर्शितेन लेखेन सह सिद्धर्षिप्रोक्तस्य पद्यस्यासगति । अयं हि तत्र (प्रबन्धकोषे) तस्यां लेख :—'एवं श्रीहरिभद्रसूरिणा २१ । द्वाविंशतिवेलायां गुरुभि-र्भणितम्—'माऽस्य वराकस्यायु स्वल्प मिथ्यादृष्टिर्न्वेति मृतस्य दीर्घ भवभ्रमण भूत् । पुनरपि २१ वार वादे जिनोऽस्मी । अधुना वादेनालम्। ललितविस्तराख्या चैत्यवन्दनावृत्ति सतर्का कृता । तदागमे पुस्तिक। पद्यपीठे मुक्त्वा गुरवो बहिरगु । तत्पुस्तिकापरामर्शाद् बोध

सम्यक् । ततस्तुष्टो निश्चलमनाः प्राह—"नमोऽस्तु०" इत्यादि ।" एतदुल्लेखस्य "अनागतं०" इति दर्शितसिद्धर्षिपद्येन विरोधः, अनागतशब्दप्रवृत्तिनिमित्तस्य भविष्यत्त्वस्य वार्तिमानिकेन तद्वृत्तान्तेनासांगत्यात् । एतेन "आचार्यो हरिभद्रो मे धर्मबोधकरो गुरुः" इत्येतदपि सिद्धर्षिसमकालिकत्वसाधकत्वेन पाश्चात्यैररीक्रियमाणमावेदितम्, गुरुत्वस्य लक्षणयोपपत्तेः, द्वितीयमतोक्तवदुपकारस्य लक्षणानिमित्ततयावश्यमङ्गीकारौचित्यात्; एवमेव तत्तत्तीर्थप्रवर्तकपुरुषादौ सुप्रतीतस्य गुरुत्वव्यवहारस्योपपाद्यत्वात्; अन्यथा चिरव्यवहितानामपि तादृशव्यवहारेण स्वस्वतीर्थादिपुरुषसमानकालिकत्वप्रसङ्गस्य दुर्निवारत्वात्; साक्षात् परम्परया वा तादृशोपकारकर्तृषु गुरुपदशक्तेरदुष्टत्वाच्च । यद्यपि, सत्यप्येवम्, एकविंशवेलायां तत्र गते सिद्धर्षौ द्वाविंशात् तदागमनात् पूर्वमेव "योगिनः पश्यन्त्येव देश-कालव्यवहितानामपि जन्तूनां छद्मस्थावस्थायामपि वर्तमाना भगवदवलोकनाया योग्यताम्" इति तदुक्त्यैव विशिष्टज्ञानेन प्रत्यागमिष्यन्तमत एवानागतं सिद्धर्षिं परिज्ञाय ततः करुणानिरतमानसस्य हरिभद्रसूरेस्तद्ग्रन्थप्रणयनसंभवात्, प्रत्यागतस्य च तदुपदर्शनेन बोधोत्पत्त्या साक्षादुपकर्तृत्वेनानुपचरितगुरुत्वोपपत्त्या सिद्धर्ष्युक्तस्य पद्यद्वयस्याप्यविरोधाद् दर्शितदोषपरिहारपूर्वकं राजशेखरसूरिमतानुकूलं शक्यते समाधानमाधातुम्; तथापि तत्रैव ग्रन्थे सिद्धर्षिणा "कालव्यवहितैरनागतमे (? त ए)व तैर्ज्ञातः समस्तोऽपि मदीयवृत्तान्तः" इत्यत्रोपन्यस्तस्य "कालव्यवहितैः" इति हरिभद्रविशेषणस्य बाधो नेषत्करप्रतीकारः, भिन्नदेशत्वे सत्यप्येककालिकानां कालव्यवधानस्य कथमप्युपपादयितुमशक्यत्वात्, कालव्यवधानं विना भिन्नदेशत्वे 'देशव्यवहितैः' इत्यस्यैव वक्तव्यस्य न्यायापन्नत्वादिति ।

द्वितीयस्मिन् मते तु नाद्यापि किञ्चिद् बाधकं प्रमाणमुपालप्सि, प्रत्यपत्सि चोपरितनमतसंबाधमेवात्र संवादम्; इति यावत् किञ्चित् सुविनिश्चितबाधकोपलम्भमेतदेव युक्तमवगच्छामि ।

एवं च सामान्यतः सिद्धर्षिसूरिप्राच्यत्वे हरिभद्रसूरेर्विदितेऽपि विशेषतः समयजिज्ञासापरिपूर्त्यै वक्ष्यमाणानि प्राचामेव वचनानि पर्याप्तानि, येषु जन्मादिसमयेऽनिदर्शितेऽपि, दर्शितेन वीरादेकादशशताब्दीरूपेण विक्रमाद् वा षष्ठशताब्यात्मकेन तन्निर्वाणसमयेन, यः पञ्चाशद्वर्षाहीनाधिकतया विसमुद्यमानोऽपि तादृशमहान्तरालरहितत्वेन विशिष्टप्रमाणविरहेण च सदृशाङ्गीकर्तव्यताकः समीक्ष्यते, तत्सत्तासमयानुमितिः स्वयमुदेष्यति प्राज्ञानाम्; तानि चैतानिः—

(१) प्रद्युम्नसूरीणां विचारसारप्रकरणे;—

"¹पंचसए पणतीए विक्कमभूवाउ झत्ति अत्थमिओ
हरिभद्दसूरिसूरो धम्मरओ देउ मुक्खसुहं ॥ ३० ॥
अहवा,
पणपन्नदससएहिं हरिसूरी आसि तत्थ पुव्वकई ।
तेरसवरिससएहिं अईएहिं वि बप्पहट्टिपहू ॥३१॥"

[२] कुलमण्डनसूरीणां विचारामृतसंग्रहे—
"पूर्वश्रुतव्यवच्छेदकालानन्तरं पञ्चपञ्चाशता वर्षैर्दिवं गतैः श्रीहरिभद्रसूरिभिः ।³"

---

१ पञ्चशते पञ्चत्रिंशे विक्रमभूपाद् झगित्यस्तमितः ।
हरिभद्रसूरिसूरो धर्मरतो ददातु मोक्षसुखम् ॥ ३० ॥
अथवा,
पञ्चपञ्चाशद्दशशतैर्हरिसूरिरासीत् तत्र पूर्वकविः (कृती) ।
त्रयोदशवर्षशतैरतीतैरपि बप्पभट्टिप्रभुः ॥ ३१ ॥"

२ केचिदिह पाठभ्रममाचक्षाणाः 'पणतीए' इत्यस्य स्थाने 'पणसीए' (पञ्चाशीते) इति पाठं कल्पयन्तो वर्षपञ्चाशकविषयं मतभेदं निरस्यन्ति । व्याकरणप्रातिकूल्यं च पाठभ्रमे कारणं प्रदर्शयन्ति । वयमपि तत्र सम्मता भवेम, यदि क्वापि पुरातने आदर्शपुस्तके तादृश(पणसीए)पाठस्योपलब्धिर्भवेत् । अन्यथा, स्वतः पाठपरावर्तनधार्ष्ट्ये विधीयमाने ग्रन्थकाराभिमताभिप्रायोच्छेदजन्यं पातकमेवार्जितं स्यात्, व्याकरणप्रातिकूल्यस्य तत्र निबन्धनीभवितुमशक्तत्वात्, कर्तुर्व्याकरणानभिज्ञतामात्रसाधने तस्य सामर्थ्यात्, व्याकरणप्रातिकूल्यस्याप्येकान्ततः प्राकृतभाषाया वक्तुमशक्यत्वात्, आर्षत्वस्य तदपवादकस्य व्याकरणे प्रतिपादितत्वात्, निम्नोद्धृतायां समयसुन्दरगणीनां गाथायामपि तादृशपाठोपलम्भाच्च । स्यादेतत्, तस्यैव ग्रन्थस्यानन्तरोद्धृतगाथाया प्रतिपाद्यमानस्य वीरात् १०५५ वर्षान्तहरिभद्रनिर्वाणसमयस्य 'पणतीए' इति पाठे विरोधात्, 'पणसीए' इत्यनेन संगतेश्च कर्तुराशयस्यानुच्छेदात् पाठभ्रमो न्याय्य इति, सत्यमेतत्, यदि 'कर्तुर्द्वितीयगाथोद्धरणे वीरसमयादधिप्रतिपादनमेवाभिमतम्, न पुनस्तदापि वर्तमानो हरिभद्रसमयविषयो मतभेदो मतान्तरेण प्रतिपादयिषित' इति प्रमाणेन सिद्धं स्यात् ।

३ पूर्वश्रुतव्यवच्छेदकालो धारमाग्रतो निर्वाणाद् वर्षसहस्रमागमे प्रसिद्धः तथाप्युक्तमाचार्यैः,—"वीराद् वर्षसहस्रे गते सम्यग्मित्रे पूर्वव्यवच्छेदः" इति ।

[३] श्रीधर्मसागरोपाध्यायानां तपागच्छपट्टावल्याम्—

"श्रीवीरात् पञ्चपञ्चाशदधिकसहस्रवर्षे, विक्रमात् पञ्चाशीत्यधिकपञ्चशतवर्षे याकिनीसूनुः श्रीहरिभद्रसूरिः स्वर्गभाक् ।"

[४] श्रीसमयसुन्दरगणीनां गाथासहस्र्याम्—

"पंचसए पणतीए विक्कमकालाउ झत्ति अत्थमिओ ।
हरिभद्दसूरिसूरो निव्वुओ दिसउ सिवसुक्खं ॥ १० ॥".

किञ्च, वीरप्रभोरष्टाविंशे पट्टे समुपजातस्य मानदेवसूरेः, यस्योपरितन एव समयो निर्विवादमिष्यते, प्रकृतसूरिमित्रतायाः प्रतिपादकैर्नीचैरुपदर्शितवचनैरप्यस्याचार्यस्य स एव समयो निर्णीयते; तथा च क्रियारत्नसमुच्चये गुणरत्नसूरयः—

"ख्यातः श्रीहरिभद्रमित्रमभवत् श्रीमानदेवस्ततः"

गुर्वावल्यां श्रीमुनिसुन्दरसूरयश्च—

"अभूद् गुरुः श्रीहरिभद्रमित्रं
श्रीमानदेवः पुनरेव सूरिः ।
यो मान्द्यतो विस्मृतसूरिमन्त्रं
लेभेऽम्बिकाऽऽस्यात्तपसोज्जयन्ते ॥"

पूर्णिमागच्छपट्टावल्यामपि—

"विद्यासमुद्रहरिभद्रमुनीन्द्रमित्रं
सूरिर्बभूव पुनरेव हि मानदेवः ।
मान्द्यात् प्रयातमपि योऽनघसूरिमन्त्रं
लेभेऽम्बिकामुखगिरा तपसोज्जयन्ते ॥"

पाश्चात्यदेशे जैनशास्त्रज्ञेषु विश्रुतनामधेयः Dr. H. Jacobi पण्डितस्तु सर्वस्याप्येतस्य द्वितीयकल्पीयमतस्येमानि त्रीणि बाधकान्यावेदयन्, आद्यमतानुमतं स्वमन्तव्यं द्रढयति;—

[१] हरिभद्रसूरिगुरुर्जिनभद्रो वीरसंवत्सरे ११९५मिते दिवं गतः, "पञ्चदशाधिकैकादशशतवर्षे श्रीजिनभद्रगणिर्युगप्रधानः" इति महोपाध्यायधर्मसागरपट्टावल्यामेवोल्लेखात्; हरिभद्रश्च वीरात् १०५५ वर्षे त्रिदशसदनमासादयिष्यमाणः, इति शिष्यावसानाद् गुरोः षष्टिवर्ष्याः पश्चाद् देवलोकप्राप्तिरसंभवग्रस्तेति प्रथमम् ।

[२] जिनभद्रस्यैव शीलाङ्कनाम्नाऽन्तेवासिनाऽऽचाराङ्गटीका शकाब्दे ७९८ (वीरनिर्वाणात् १४०३) वर्षे निर्मिता, इति जिनभद्रसमयविप्रतिपत्तिरूपं द्वितीयम् ।

---

१ पञ्चशते पञ्चत्रिंशे विक्रमकालाद् झगित्यस्तमितः ।
हरिभद्रसूरिसूरो निर्वृतो दिशतु शिवसौख्यम् ॥ १०० ॥

[३] जैनसिद्धान्तानां पुस्तकारोहरूपस्योद्धारस्य, यो वीरनिर्वाणात् ९८० वर्षे ९९३ वर्षे वाऽभवत्, प्रस्तुतहरिभद्रसूरीणां, यैस्तत्तत्सिद्धान्तविभागेषु बह्वयष्टीका व्यरचिषत, यासा निर्माणमुद्धारसमयानन्तर ताभ्य एव कल्पयितु शक्यते, स्वर्गवासस्य च वीरात् १०५५ वर्षेऽभ्युपगम्यमानस्य स्तोकमेवान्तरम्, यत्रासम्भविनी तावद्ग्रन्थविनिर्मितिरिति तृतीयम्।

एताश्च बाधककल्पना Dr Mironov महाशयकथनानुसारं न विचारसहिष्णुतामालम्बन्ते, जिनभटसूरीणामेव [न तु जिनभद्रगणिक्षमाश्रमणानाम्] हरिभद्रगुरुत्वात्, "जिनभटसूरिमुनीश्वर दर्श" [प्रभा० ३०] "अथ जिनभटसूरिरत्र कोपात्" [प्रभा०१८१] इत्यादिषु तन्नाम्न एवोपलम्भात्, अत्र पाठभ्रमाङ्गीकारे छन्दोभङ्गप्रकोपात्, अन्यत्र (उपदेशपदादिषु) जिनभद्रदर्शनेऽपि जिनभद्रगणीनां, यैर्विशेषावश्यकभाष्यादयो ग्रन्था अग्रन्थिषत, हरिभद्रगुरुत्वे मानाभावात, नामसादृश्यमात्रस्य प्रमाणताऽनिबन्धनत्वात्, जिनभद्रनाम्नामनेकेषां तेषा भावात्, द्वितीयस्या अपि कल्पनाया एतेनैव निरस्तत्वात्, द्विषष्टिवत्सरीरूपस्य पञ्चसप्ततिप्रतिवत्सर्यात्मकस्य वोद्धार हरिभद्रावसानान्तरकालस्य तावद्ग्रन्थकरणेऽपर्याप्तत्वाभावाच्च ।

एवं च न यावद् बलवत्तरमत एव सुनिश्चितबाधकाभाव प्रमाणरूपमासादयेम प्रतिबन्धकम्, न तावत् प्राचीनानां निर्दिष्टोल्लेखान प्रमाणीकर्तुमीशीमहि, न च विक्रमषष्ठशतकरूप वीरैकादशशतकात्मक वा हरिभद्रसूरिसमय न प्रतिपद्येमहि, नापि विप्रतिपद्येमहि हरिभद्रसूरेर्विक्रमसप्तमशतकभावित्वम्, सिद्धर्षिपूर्वतनत्वानुलङ्घनेन ततोऽपि पश्चाद्वर्तित्व वा स्वीकर्तुम्, यदि तस्यैव धर्मकीर्त्तिनाम्नो बौद्धाचार्यस्य, यस्य विक्रमीयसप्तमशतकरूप सत्ताकाल प्रतिपाद्यते पाश्चात्यैर्भारतीयैश्च भारतीशालिभि, प्रमाणवार्तिकादिग्रन्थप्रणेतृत्व प्रमाणसिद्ध स्यात्, हरिभद्रसूरिणा स्वीयेऽनेकान्तजयपताका शास्त्र वार्तासमुच्चयादौ प्रमाणवार्तिककारकस्य धर्मकीर्त्तेर्भूयो भूयो नामग्राह निर्देशात्, तस्य च पूर्वप्रतिपादितानामनेकप्राचीनोल्लेखाना विक्रमीय षष्ठशतकप्रतिपादकानां प्रतिबन्धकत्वात्, सति च बलवति प्रतिब न्धके साधनसहस्राणामप्यकिञ्चित्करत्वस्य सुविदितत्वादिति।

पर्यन्ते, यथावध्युपलब्धस्यास्मत्स्याप्यनल्पगुणगणविभूषितस्य हरिभद्रसूरिचरित्रस्य, आनुषङ्गिकस्य चान्यस्मैशस्यैकस्यनामुपगतस्य

"अन्यत्र, संत्यज्य समस्तसत्त्वा
मात्सर्यदुःखं भवबीजभूतम् ।
सुखात्मकं मुक्तिपदावहं च
सर्वत्र माध्यस्थ्यमवाप्नुवन्तु[1] ॥"

इति ग्रन्थकृच्छब्देष्वेव स्वमार्गाणां विनियम्य नयामि समाप्तिमिमं लघीयांसं निबन्धम् ।

॥ समाप्तम् ॥



१ आवश्यकनिर्युक्तिटीकाप्रान्तभागस्थम् । (See Peterson 3 Rep. P. 202)